श्रीरसनाथशर्म्मा

गदाधरन्यूनतावादः

तथा

दीधितिकृन्न्यूनतावादः

महामहोपाध्यायोपाधिक-

श्रीराखालदास-न्यायरत्न-भट्टाचार्य्येण

विरचितः

श्रीश्रीशङ्करतर्करत्नेन श्रीपञ्चानन-तर्कवागीशेन

श्रीहरिहर-भट्टाचार्य्येण च

सङ्कलितः

श्रीभारतधर्म्ममहामण्डलशास्त्रप्रकाशकसमितितः प्रकाशितः

PRINTED BY A. C. CHAKRAVARTY AT THE
M. S. P. S. PRESS, BENARES CANT.

1910.

Krish[illegible] Academy,
K. 37/110 [illegible]ndi Lane,
Shri Kri[illegible]s Bhawan,
Varanasi 221001. (India)

अनुक्रमणिका

१ ।
२ ।
३ ।
४ ।
५ ।
६ ।
७ ।
८ ।

B132
N8
R195x
1910

विज्ञापनम् ।

मूल्यम्

१। अद्वैतवादखण्डनम् दीधितिकृन्न्यूनतावाद-सहितम् [ग्रन्थकर्तुः सम्प्रतिमूर्त्तिजीवनचरितोपेतम्] २)

२। अद्वैतवादखण्डनपरिशिष्टम् .... ।=)

३। विविध-विचारः

[अत्र निर्विकल्पकज्ञानव्यवस्थोपनयसन्निकर्षव्यवस्थापन-क्षणभङ्गुरवादिमतनिरसन-वाक्यगतस्फोटरूपपदार्थान्तर-वादिमतखण्डनसांसर्गिकविषयतासाधनप्रकार-दीधिति-कृदनङ्गीकृतविशेषस्थापनप्रभृतयो बहवो नवीनविचाराः सन्ति ।] ... ... १)

४। शक्तिवादरहस्यप्रकाशः

[गदाधरकृतशक्तिवादस्य प्राणभूतोऽयं ग्रन्थः] ... ।)

५। कवितावली .... ।)

६। तत्त्वसारः तथा रसरत्नम्

[अत्र मनस्येव चैतन्यादिकं व्यवस्थापितम्] ... ॥)

७। जीवतत्त्वनिरूपणम् .... ॥)

८। गदाधरन्यूनतावादः तथा दीधितिकृन्न्यून-तावादः .... ॥)

महामहोपाध्याय-श्रीयुक्त-राखालदासन्यायरत्न-महाशयप्रणीतानि पुस्तकान्येतानि निम्न-लिखि-तस्थाने लभ्यन्ते ।

श्रीहरिहर-भट्टाचार्य्यः—

१८५, सोनारपुरा,

बनारस सिटि ।

ईऊ. पी.

॥ श्रीदुर्गा ॥

गदाधरन्यूनतावादः ।

मातर्ममातितमसावृतमाद्यविद्ये
चेतोऽतिकुत्सितकुचाञ्चितमीशहृद्ये ।
नान्ये स्पृशन्तु घृणयन्तु सुराः शरण्ये
नोपेक्ष्यमत्र नटनं तव दक्षकन्ये ॥ १ ॥
रसमेतद्विचारस्य सत्तर्करससेविनः ।
विद्वेषदोषरहिताः प्रभवन्ति परीक्षितुम् ॥२॥
भो लब्धवर्ण भवतः सविधे सुवर्णं
मुद्राशताप्रिजमुदं न च कामयेऽहम् ।
क्षुद्रस्य मे विनय एष तु मुद्रितोऽयं
दृश्योऽस्त्वमुद्रनयनेन दयासमुद्र ॥ ३ ॥
आन्वीक्षिकीशास्त्रगगूढतत्त्वं
वेत्तुं भवन्तो यदि कामयन्ते ।
तदा मुदा मद्रचितां समस्तां
विद्यार्थिनः पश्यत यूयमेताम् ॥ ४ ॥
सन्निबन्धस्याभिनये दूषको नैव दोषभाक् ।
किं विद्विषन्ति विद्वांसः सन्नाटकविदूषकम् ५

गदाधरोद्भावितयुक्तिखण्डनं
मदुक्तमेतद् यदि जातु मण्डनम् ।
सुपण्डितैः कुण्डलतुल्यमुच्यते
तदा मदुक्तिः सफलेति सूच्यते ॥ ६ ॥

प्रशस्ततमैः पूर्व्वतनतार्किकैर्निर्दोषतया निर्द्धारितां सत्प्रतिपक्षग्रन्थान्तर्गत–रत्नकोषकारमतद्योतकसन्दर्भादवगतां गदाधरगीतयुक्तिपङ्क्तिकां दूषयितुं मादृशामायासप्रकाशो विदुषां विस्मयरसलेशमपि मा प्रसूयताम् ।–

शालग्रामशिलाच्छिद्रं क्षुद्रकीटेन सृज्यते ।
शक्यते न च तत् कर्त्तुं दन्तिप्रभृतिदन्तुरैः ॥
महावृषविषाणाग्रैर्हीरो नोपैति भग्नताम् ।
स मेषशृङ्गसंसर्गान्मिमेषाद् याति चूर्णताम् ॥

" इदन्त्वबधातव्यं विरोधिज्ञानदशायां आहार्य्यज्ञानोपपत्तये यदि निरुक्तमनाहार्य्यत्वं प्रतिबध्यतावच्छेदककोटौ निवेश्यते तदा तस्याव्यवहितोत्तरत्वघटितत्वेऽव्यवहितोत्तरत्वस्य चानुगतस्य दुर्व्वचत्वात् इच्छाव्यक्तिसमसङ्ख्यभेदानां निवेशनीयतया महागौरवम् । इच्छाया ज्ञानसामग्रीघटकतानिर्व्वाहाय तस्यास्तदुत्तेजकतैवयसम्भवः विरोधिज्ञानदशायां चाक्षषत्वादिप्रकारकेच्छाबलात् स्पार्शनाद्यनुत्पत्त्या तत्तज्जातीयप्रत्यक्षेच्छानां विशेष्योत्तेज-

कतां स्वीकृत्य तत्तज्जातीयप्रत्यक्षे पृथक् प्रतिबन्धकतायाः आवश्यकत्वात्। तथा चानुमितिस्थले पृथक्प्रतिबन्धकताया अप्रामाणिकत्वात् संशयानुमितिर्दुर्वारैवेति॥" इत्यन्तग्रन्थेन गौरवं प्रदर्श्यानुमितौ संशयत्वनिराकरणाय स्वकृतसन्दर्भेण युक्तिः प्रदर्शिता गदाधरेण। सन्दर्भो यथा,—

"अत्राहुः अस्तु प्रत्यक्षस्थले विरोधिज्ञानप्रतिबन्धकतायामिच्छानामुत्तेजकतैव तथापि परोक्षशाब्दादिस्थले प्रत्यक्षान्यत्वसहितस्य ज्ञानत्वस्य प्रतिबध्यतावच्छेदकत्वमङ्गीक्रियते न तु शाब्दत्वादिनानाधर्म्माणामिति न संशयानुमितिप्रसङ्गः। न च प्रत्यक्षान्यत्वज्ञानत्वयोरेकविशिष्टापरस्यैवानतिप्रसक्तस्यावच्छेदकत्वमङ्गीकार्य्यं तत्र च विशेषणविशेष्यभावे विनिमनाविरह इति वाच्यम्, प्रत्यक्षान्यत्ववैशिष्ट्यस्य गुणत्वादिसाधारणतया तन्माश्रेण ज्ञानस्य विशेष्यत्वे विशेष्यतावच्छेदकतया ज्ञानत्वत्वस्यापि निवेशनीयतया गौरवेण स्वतोऽव्यावृत्तज्ञानत्वविशिष्टप्रत्यक्षान्यत्वस्यैवावच्छेदकत्वा" दिति।

न च किञ्चिद्धर्म्मावच्छिन्नवाच्यताप्रकारकज्ञानस्यैवोपमानफलत्वेन तत्प्रकारकोपमितित्वावच्छिन्नप्रतिबध्यतामादायास्तु प्रतिबध्यताधिक्यमतस्तादृशस्थल एव प्रत्यक्षान्यज्ञानत्वेन प्रतिबध्यतामास्तामास्ताञ्च तादृशवाच्यतानुमितावेव संशयत्वं तादृशवाच्यत्वभिन्ननिखिलप्रकारकबुद्धौ शाब्दत्वादिरूपलघुधर्म्मेणैकस्या एव प्रतिबध्यतायाः कल्पनीयतया तत्तत्प्रकारकसंशयानुमितिः कथं वार्य्यते इति वाच्यम्, सकलपदार्थानामुपमाया-

अविधेयत्वेऽपि वाच्यतावच्छेदकधर्म्मघटकतया प्रकारकत्वे निर्व्विवादत्वाच्चेति गदाधरव्यवस्था, सा तु भ्रान्तिमूलैव । यतो गदाधरमते गुरुधर्म्मावच्छिन्नप्रतिबध्यताचतुष्टया पत्तिर्वज्रलेपैव । तथाहि तत्तद्धर्म्मावच्छिन्नप्रकारतानिरूपिततादृशधर्म्मावच्छिन्नविशेष्यताशालिज्ञाननिष्ठत्वसहितप्रत्यक्षान्यत्वेनैकम्, तादृशविशेष्यतानिरूपिततादृशप्रकारताशालिबुद्धिवृत्तित्वसहितप्रत्यक्षान्यत्वेन द्वितीयम्, प्रत्यक्षभिन्नज्ञानवृत्तित्वविशिष्टतादृशविशेष्यतानिरूपिततादृशप्रकारत्वेन तृतीयम्, प्रत्यक्षभिन्नज्ञानवृत्तित्वविशिष्टतादृशप्रकारतानिरूपिततादृशविशेष्यत्वेन चतुर्थम् । एवंक्रमेण प्रतिबध्यत्वचतुष्टये विनिगमनाविरहः । एवं च प्रत्यक्षान्यत्वमनिवेश्य शाब्दत्वोपमितित्वे निवेश्य प्रतिबध्यताचतुष्टयकल्पनमेव युक्तमवच्छेदकानां लघुशरीरत्वात् । अपि च निरवच्छिन्नत्वेन निरवच्छिन्नत्वव्याप्यवत्त्वेन वा वृत्तित्वाभाववत्त्वेन तदव्याप्यवत्त्वेन वा ज्ञायमानवाच्यत्वघटितपदार्थविषयकोपमितेः कदाप्यसम्भवेन दर्शितनिरवच्छिन्नत्वादिप्रकारेण वाच्यतानुमितेः संशयात्मिकायाः कथमपि वारणासम्भवात् ।

अथ धर्म्मितावच्छेदकत्वादिप्रत्यासत्त्या प्रतिबध्यप्रतिबन्धकभावमत एव गदाधरग्रन्थः । तत्पारिपाट्यं तु प्रत्यक्षान्यज्ञानसामान्यं प्रति सामान्यतो निश्चयत्वेनैव प्रतिबन्धकत्वम् । प्रतिबध्यतावच्छेदकसम्बन्धः स्वनिरूपिततत्तद्धर्म्मावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकत्वरूपः, प्रतिबन्धकतावच्छेदकसम्बन्धस्तु स्वीयतत्तद्भावव्याप्यत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकत्वरूपः । अत्र च शाब्दत्वोपमितित्वे अन्तर्भाव्य

प्रतिबध्यत्वकल्पने प्रतिबध्यत्वद्वयापत्तिरिति चेन्न तन्मते तत्पुरुषीयत्वनिवेशावश्यकत्वेन तत्पुरुषीयत्वप्रत्यक्षान्यत्वयोर्मिथो वैशिष्ट्यापन्नयोर्विनिगमनाभावेन गुरुधर्म्मावच्छिन्नप्रतिबध्यताद्वयापत्त्या शाब्दत्वोपमितित्वरूपलघुधर्म्माभ्यां प्रतिबध्यताद्वयस्यैव युक्तत्वात् ।

गदाधरविचारस्यापरमपि रहस्यं पश्यत । शाब्दत्वोपमितित्वाभ्यां प्रतिबध्यत्वसिद्धौ संशयानुमितिः कथमपि वारयितुं न शक्यते इति महद्वयम्, अतस्ताभ्यां प्रतिबध्यताद्वयं "सर्व्वस्वेनापि कर्त्तव्य"मितिन्यायेन खण्डितम् ।

अत्र वयं ब्रूमः,—शाब्दत्वादिना प्रतिबध्यत्वस्वीकारेऽप्यनुमितित्वेनापि पृथक्प्रतिबध्यत्वस्वीकारस्य किं नावश्यकत्वम् ? नो चेद् वह्निमत्पर्व्वतो घटव्याप्यवानितिनिश्चयोत्तरं वह्न्यभावव्याप्यवान्पर्वत इतिनिश्चयोत्पत्तावपि वह्निमत्पर्व्वतो घटवानित्याकारिकानुमित्यापत्तिः पूर्वक्षणपर्य्यन्तपरामर्शसत्त्वात् । अतोऽनुमितित्वावच्छिन्नं प्रत्यपि विरोधिव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वं स्वीकर्त्तव्यम् । दर्शितविरोधिव्याप्यवत्तानिश्चयोत्तरं दर्शिताकारानुमितिर्न जायते इति स्वकृतसन्दर्भेण स्पष्टीकृतं गदाधरेण ।

अथ शाब्दादिस्थले तत्तद्धर्म्मावच्छिन्नप्रकारतानिरूपितविशेष्यताघटितशाब्दत्वादिना प्रतिबध्यत्वं यदि तिष्ठेत् तदाऽनुमितिस्थले तत्तद्धर्म्मावच्छिन्नावच्छेदकतानिरूपितविशेष्यताशाल्यनुमितित्वेनैव तत् कल्पयितुं शक्यते तावतैव दर्शितानुमित्यापत्त्यसम्भवात् विधेयतामात्रस्यैवावच्छेदकतानात्मकतया च संशयानुमितेरुप-

पत्तिसम्भवात् । एतदुभयेनैव प्रत्यक्षान्यज्ञानत्वरूपानुमितिसाधारणधर्म्मेण प्रतिबध्यत्वस्थापने प्रयत्नः समुचित एव, ईदृशप्रतिबध्यतावच्छेदकशरीरे सामान्यतः प्रकारतामनिवेश्य दर्शितावच्छेदकतामात्रं निवेशयितुं न शक्यते, तथा सति शाब्दादिस्थले साक्षात्प्रकारताशालिशाब्दादिकं प्रत्यपि विरोधिव्याप्यवत्तानिश्चयस्याप्रतिबन्धकतापत्तेर्बज्रलेपतैव । न चानुमितित्वघटितधर्म्मावच्छिन्नप्रतिबध्यताघटकतया प्रकारतामनिवेश्य तत्स्थलाभिषिक्तमवच्छेदकत्वमात्रं निवेश्यानुमितौ भवता यथा संशयत्वमुपपादितं तथा मयापि अवच्छेदकत्वस्थलाभिषिक्तं शाब्दादिस्थल इव प्रकारत्वं निवेश्यानुमितौ संशयत्वं निराकर्त्तुं शक्यते उभयमत एव प्रतिबध्यतावच्छेदकधर्म्माणां समशरीरत्वादिति को हि भवदभिमान इति वाच्यम्, अवच्छेदकयोः साम्ये आश्रयलाघवस्य वस्तुकल्पकतायाः सकलग्रन्थकारसम्मतत्वेन निरुक्तावच्छेदकताघटितानुमितित्वेनैव प्रतिबध्यताकल्पनाया युक्तत्वादिति चेन्न यतः पर्व्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वाद्यवच्छिन्नप्रकारताकबुद्धिमेव तदवच्छिन्नविशेष्यको वह्न्यभावादिव्याप्यवत्तानिश्चयः प्रतिबध्नाति, न तु वह्न्याद्यवच्छिन्नविशेष्यकपर्व्वतत्वावच्छिन्नप्रकारिकां एकत्र द्वयमितिरीत्या तदुभयप्रकारिकां वा बुद्धिमिति सर्व्वेषां सिद्धान्तः । एवञ्च द्रव्यत्वविशिष्टे वह्निपर्व्वतत्वयोरेकत्र द्वयमित्यादि विषयीकृत्य यत्त्रितयधर्म्मावच्छिन्नविशेष्यकं घटत्वाद्यवच्छिन्नप्रकारकं वह्निपर्व्वतत्ववद्द्रव्यं घटवदित्याकारकं यज्ज्ञानं तादृशज्ञानं प्रत्यपि पर्व्वतत्वावच्छिन्नविशेष्यकवह्न्यभावव्याप्यवत्तां

निश्चयस्य प्रतिबन्धकतापत्तिः,—घटत्वावच्छिन्नप्रकारता-निरूपितायामुक्तत्रितयधर्म्मावच्छिन्नविशेष्यतायां पर्व्वतत्वावच्छिन्नतस्य वह्नित्वावच्छिन्नावच्छेदकतानिरूपितत्वस्य च प्रतिबध्यतावच्छेदकघटकतया भवदभिमतस्य द्वयोरेवानपायात् ।

गदाधरसन्दर्भस्तु—

"अव्यवहितोत्तरत्वसम्बन्धेन विरोधिनिश्चयानवच्छिन्नस्यैव प्रतिबध्यतावच्छेदकत्वमङ्गीक्रियतां तथा सति दोषविशेषाद्यजन्यत्वादेरप्यनिवेशनीयतया लाघवात्, तथा च उभयव्याप्यवत्तानिश्चयदशायां संशयानुमितेरुपगमेऽपि तादृशप्रतिबन्धकाभावव्यभिचारशङ्कानवकाशात् विरोधिपरामर्शाभावाघटिताया एवानुमितिसामग्र्या अनुमित्युत्पादप्रयोजकत्वोपगमात् संशयानुमितिर्निष्प्रत्यूहैव । एतेन वह्न्यभावव्याप्यवान् पर्व्वत इत्याकारकाश्रयासिद्ध्यादिनिश्चयदशायां वह्निमान् पर्व्वतो घटवान् इत्याद्यनुमितिवारणाय वह्न्यादिप्रकारकानुमितावपि तदभावव्याप्यबुद्धेः प्रतिबन्धकत्वमावश्यकमिति न संशयानुमितिप्रसङ्ग इत्यपि निरस्तम् ।—तदभावव्याप्यवत्तानिश्चयाभावान्तर्भावेऽपि प्रयोजनविरहेण तद्विधेयकानुमितिसामग्र्यां तदन्तर्भावानुपगमात्।" इत्यन्तः । स चात्यन्तासङ्गतः । यतो दोषविशेषाद्यजन्यत्वं प्रतिबंध्यतावच्छेदके न निवेश्यम्, अपि तु साक्षात्कारान्यग्राह्यप्रकारकबुद्धिं प्रति ग्राह्याभावव्याप्यवत्तानिश्चयस्य प्रतिबन्धकत्वमिति गदाधरेणैव प्राग् दर्शितम् । एवञ्च दोषविशेषाद्यजन्यत्वस्य प्रतिबध्यतावच्छेदककोटौ पुनर्निवेशो नास्ति अनावश्यकत्वात्, साक्षात्कारान्यत्वविशेषणेनैव

दोषविशेषाजन्यसकलप्रतिबध्यज्ञानानां संग्रहात् । दोषविशेषजन्यानां लौकिकसन्निकर्षजन्यानाञ्च निखिलप्रत्यक्षाणामनुगमकं साक्षात्कारत्वमिति पक्षतानन्थे समानविषयकलौकिकप्रत्यक्षस्यानुमितिप्रतिबन्धकत्वविचारप्रकरणे जगदीशेनापि स्वहस्तितम् ।

न चानाहार्य्यत्वस्य प्रतिबध्यतावच्छेदककोटौ गदाधरमते निवेशासत्त्वात् एतन्मते तन्निवेशस्यावश्यकतया गौरवमिति वाच्यम्, गदाधरमते प्रतिबध्यतावच्छेदकीभूतविरोधिनिश्चये अनाहार्य्यत्वनिवेशस्यावश्यकतया मतद्वय एव तन्निवेशप्रयुक्तगौरवस्याविशेषात् । परन्तु विरोधिविषयकनिश्चयानवच्छिन्नत्वस्य प्रतिबध्यतावच्छेदककोटौ निवेशकल्पे महागौरवम् । यत एतत्कल्पे अनन्ताप्रामाण्यग्रहाभावानां निश्चयत्वस्य च प्रतिबध्यतावच्छेदककोटौ प्रवेशावश्यकत्वम् ।

न च तत्तदप्रामाण्यग्रहाभावाः प्रतिबध्यतावच्छेदककोटौ न निवेशनीया इति वाच्यम्, तथा सति अप्रामाण्यग्रहास्कन्दितबाधादिनिश्चयकाले अप्रामाण्यग्रहाभावविशिष्टतादृशप्रतिबन्धकाभावसत्त्वेन विरोधिनिश्चयानवच्छिन्नानुमितेर्दुर्वारतापत्तेः ।

न च प्रतिबन्धकतावच्छेदककोटावपि अप्रामाण्यग्रहाभावा न निवेश्यन्ते, एवञ्च तादृशाप्रामाण्यग्रहास्कन्दितबाधादिनिश्चयोत्तरं न तादृशनिश्चयानवच्छिन्नानुमितेरापत्तिरीदृशप्रतिबन्धकभावस्य तत्रासत्त्वात् । इत्थं च प्रतिबन्धकतावच्छेदककोटौ च निश्चयत्वानिवेशेऽपि न क्षतिरिति वाच्यम्, एतेऽप्रामाण्यग्रहास्क-

न्दितबाधज्ञानकाले केवलपक्षतापरामर्शसमाजेन यादृश-पक्षकयादृशसाध्यकानुमितिरुत्पद्यते अप्रामाण्यज्ञाना-नास्कन्दितबाधादिनिश्चयकालेऽपि तादृशसमाजात् तादृशपक्षसाध्यकानुमितेरुत्पादापत्तिर्गीर्व्वाणगुरूणाम-प्यशक्या स्याद्वारयितुम्।

अथ ग्राह्याभावव्याप्यवत्तापरामर्शस्य प्रतिबन्धक-तास्थले अप्रामाण्यग्रहाभावविशिष्टनिश्चयानवच्छिन्न-त्वरूपगुरुधर्म्मो न प्रतिबध्यतावच्छेदकः, परन्तु प्रकृत-पक्षेप्रकृतसाध्याभावानुमितित्वाच्छिन्नजन्यतानिरूपित-जनकतावच्छेदकतापर्य्याप्त्यधिकरणधर्म्मवदनवच्छिन्नत्व-मेव तत्। एष पक्षोऽप्रामाण्यज्ञानानामनुमितिजनकतायां-मुत्तेजकत्वपक्षमवलम्ब्यैव । प्रतिबन्धकत्वमपि तादृश-जनकतावच्छेदकतापर्य्याप्त्यधिकरणधर्म्मवत्त्वेन इति चेन्न यतः पर्य्याप्त्यधिकरणधर्म्मान्तर्गतज्ञानत्वस्य स्वरूपस-म्बन्धेनावर्त्तमानत्वात् । नापि समवायेन तदन्तर्गता-प्रामाण्यज्ञानाभावानाहार्य्यत्वादेः समवायेनावर्त्तमान-त्वात्।

न च स्वरूपसमवायान्यतरसम्बन्धेन पर्य्याप्त्यधिक-रणधर्म्मवत्त्वं विवक्षणीयं तावतापि लाघवानपायादिति वाच्यम्, दर्शितजनकतावच्छेदकधर्म्मवत्त्वेनानुगतप्रति-बन्धकत्वासम्भवात्। यतः हेतुव्यापकसमानाधिकरण-धर्म्मवत्त्वेन जनकत्वं प्रतिबन्धकत्वं तु हेतुव्यापकसाध्या-भावनिश्चयविशिष्टपक्षधर्म्मिकहेतुमत्तानिश्चयत्वेन, प्रति-हेतुव्यापकः साध्याभावः प्रतिहेतुमांश्च पक्ष इत्यादि-निश्चयसाधारण्यानुरोधात्।

न च साध्याभाववदवृत्तिमान् पक्ष इत्येव ज्ञानमनु-

मितिकारणं सत्प्रतिपक्षश्च स एव अतो जनकतायां प्रतिबन्धकतायां च दर्शितैकरूपावच्छिन्नत्वं नानुपपद्यते इति वाच्यम्, मणिकारेण सत्प्रतिपक्षलक्षणस्य प्रणीततया साध्याभाववदवृत्तित्वे व्याप्तित्वस्य खण्डिततया च मणिकारग्रन्थे तदभिप्रायोपवर्णनस्यात्यन्तासङ्गतत्वात् ।

वस्तुतस्तु साध्यविरोध्युपस्थापनसमर्थानवच्छिन्नज्ञानं प्रति साध्यविरोध्युपस्थापनसमर्थत्वेन प्रतिबन्धकत्वमिति सामान्यतः प्रतिबन्धकत्वकल्पने महालाघवात् । तथाहि साध्याभावव्याप्यवान् पक्षः, पक्षनिष्ठाभावप्रतियोगित्वव्याप्यवत् साध्यं, साध्यं पक्षावृत्तित्वव्याप्यवत्, साध्याभावः पक्षवृत्तित्वव्याप्यवानित्यादिबहुविधनिश्चयस्य एतत्कल्पे एकरूपेण प्रतिबन्धकत्वम् । लक्षधर्म्मिकसाध्याभावानुमितिसमर्थत्वेन साध्यधर्म्मिकपक्षनिष्ठाभावप्रतियोगित्वानुमितिसमर्थत्वादिबहुप्रतिबन्धकत्वकल्पनमतिगौरवग्रस्तम् ।

अथ विरोध्यनुमितिसमर्थत्वं कथमनुगतो धर्म्म इति चेत् तस्यानुगतत्वं "विरोध्यनुमितिसमर्थ–" इत्यादिसत्प्रतिपक्षलक्षणकृद्ग्रन्थकारं परिपृच्छ । एतेन साध्याभाववदवृत्तित्वस्य व्याप्तित्वे तस्यैव सत्प्रतिपक्षघटकत्वे च ईदृशप्रतिबध्यप्रतिबन्धकभावः साधीयानिति । एवं व्यवस्थिते गदाधरेण तद्विधेयताकानुमितिसामग्र्यां सत्प्रतिपक्षाभावमप्रवेश्य तद्विधेयताकानुमित्युत्पत्तिप्रयोजकत्वकल्पनमत्यन्तमसङ्गतम् । तथा सति पक्षनिष्ठाभावप्रतियोगित्वव्याप्यवत् साध्यं साध्यव्याप्यहेतुमान् पक्ष इत्यादिसत्प्रतिपक्षस्थले संशयात्मकानुमित्यसम्भवेन

दर्शितपरामर्शद्वयसत्त्वे साध्यविधेयताकानुमितौ निश्चयत्वापत्तेर्गार्ग्वाणगुरुणाऽप्यशक्यपरिहारत्वात् ।

एवञ्च तद्विधेयताकानुमित्युत्पत्तौ सहकारित्वेन विरोधिपरामर्शाभावो न प्रवेशनीय इतिगदाधरोक्तिरत्यन्तमश्रद्धास्पदम् । मणिकारमतेऽनुमितिजनकतावच्छेदकप्रतिबन्धकतावच्छेदकयोरनैक्येन मास्तु विरोध्यनुमितिसमर्थत्वेन प्रतिबन्धकत्वम्, परन्तु यदङ्कुरविशेषे विरोधिपरामर्शेषु कदाचिदप्रामाण्यज्ञानं न जायते तादृशस्थलविशेष एव ईदृशप्रतिबध्यप्रतिबन्धकभावः कल्पनीय इत्यपि न सम्भवति,—साक्षात्कारान्यग्राह्यप्रकारकबुद्धित्वापेक्षया ग्राह्याभावे प्रतिहेतुव्यापकत्वविषयत्वघटितविषयतानामतिगुरुशरीरतया तादृशविषयताशालिनिश्चयत्वेन निश्चयनिष्ठप्रतिबध्यतावच्छेदकतायाविनिगमनाविरहेण व्यापकत्वविषयतान्तःपातिप्रत्येकविषयत्वावच्छिन्नावच्छेदकताकबहुप्रतिबध्यत्वानाञ्च कल्पनापेक्षया दर्शिताङ्कुरविशेषेष्वपि साक्षात्कारान्यविशिष्टबुद्धित्वेनैव प्रतिबध्यत्वकल्पने महालाघवात् । एवं साक्षात्कारान्यत्वापेक्षया संशयान्यत्वरूपं निश्चयत्वमतिगुरुशरीरमननुगतञ्च ।

न च निश्चयत्वं जातिरिति वाच्यम्, तस्य जातितायाः दीधितिकारप्रभृतिसर्व्वसिद्धान्तिनामसम्मतत्वात्, तस्यार्थसमाजप्रयुक्तत्वेन कस्या अपि जन्यतायाः अवच्छेदकतया सिद्ध्यसम्भवात् । यतो जन्यगतजातिमात्रस्यैव किञ्चित्कारणतानिरूपितजन्यतावच्छेदकतयैव सिद्धिरिति सर्व्वेषामेव सिद्धान्तः । तत्र किञ्चिज्जन्यतावच्छेदकत्वमस्तीति सम्भावयितुमपि न कोऽपि प्रभवेत् ।

तथा सति निश्चयत्वस्य दीधितिकारेणार्थसमाजप्रयोज्यत्वव्यवस्थापनस्योन्मत्तप्रलपितत्वापत्तेः ।

अथ तद्विरोधिव्याप्यवत्तानिश्चयस्य तद्विशिष्टविषयकबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकत्वे पर्व्वते वह्निप्रकारकबुद्धित्वेन वह्नौ आधेयतासम्बन्धेन पर्व्वतप्रकारकबुद्धित्वादिना च बहुप्रतिबध्यतानापत्तिः सुतरां बहुप्रतिबन्धकत्वानाम् । तदपेक्षया तादृशव्याप्यवत्तानिश्चयानवच्छिन्नबुद्धिसामान्यं प्रति तादृशव्याप्यवत्तानिश्चयत्वावच्छिन्नमेकमेव प्रतिबन्धकत्वं दर्शितबहुविधप्रतिबध्यतास्थलाभिषिक्तमेकमेव प्रतिबध्यत्व च कल्पयितुं युक्तमिति चेन्न ततः पर्व्वतो वह्निव्याप्यवान् वन्ह्यभाववांश्चेत्याव्याकारकसमूहालम्बनज्ञानस्याव्यवहितोत्तरत्वसम्बन्धेन विरोधिपरामर्शानवच्छिन्नतया तज्ज्ञानपूर्व्वं विरोधिपरामर्शरूपनिश्चयस्यासत्त्वेन चोक्तसमूहालम्बनाहार्य्यज्ञानापत्तिवारणाय विरोधिपरामर्शाभावस्य कार्य्यकालवृत्तितया कारणत्वमावश्यकम् । एवञ्च विरोधिपरामर्शानुत्तरजायमानसमूहालम्बनरूपं पर्व्वतो घटवान् वह्निव्याप्यवानित्याकारकज्ञानं नोपपद्येत कार्य्यकाले प्रतिबन्धकसत्त्वात् । अतो विरोधिनिश्चयानवच्छिन्नबुद्धित्वेनप्रतिबध्यतापक्षेऽपि प्रकारताविशेषविशेष्यताविशेषयोरपि तत्तत्प्रतिबध्यतावच्छेदकान्तर्भाव आवश्यकः । सुतरामेतत्कल्पे क लाघववार्त्तापि । अत एव गदाधरस्य प्रतिबध्यताबाहुल्यरूपबलवद्दोषमप्रदर्श्य केवलमवच्छेदकगौरवदर्शनमपि साधु सङ्गतम् । उक्तयुक्त्या च विरोधिव्याप्यनिश्चयाभावस्य कार्य्यकालवृत्तितया कारणत्वस्यावश्यकत्वेन विरोधिव्याप्यवत्तानिश्चयस्य ग्राह्यविधेयका-

नुमितिं प्रत्यपि ग्राह्याभावव्याप्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वस्यावश्यकत्वम् । अन्यथा साध्यतदभावव्याप्यवान् तदुव्याप्यव्याप्यवांश्च पक्ष इतिसमूहालम्बननिश्चयोत्तरं ग्राह्यवान् न वा ग्राह्यव्याप्यवांश्चेतिविरोधिनिश्चयात्मकसंशयापत्तिर्दुर्व्वारैव । न हि ग्राह्यव्याप्यवत्तानिश्चयात्मकं ग्राह्यसंशयं कोऽपि स्वीकरोति । इति गदाधरसमाधानं भ्रान्तिमूलकमेव ।

वस्तुतस्तु प्रतिबध्यप्रतिबन्धकभावो यथातथास्तु तद्विधेयकानुमितिसामग्र्यां तादृशविरोधिव्याप्यवत्तानिश्चयाभावादेरप्रवेशे दर्शितविरोधिव्याप्यवत्तानिश्चयात्मकसंशयानुमितेर्गौर्वाणगुरुणापि वारयितुं न शक्यते । एवमव्यवहितोत्तरत्वघटितस्य प्रतिबध्यतावच्छेदकत्वस्वीकारे पक्षतायन्थे मथुरानाथप्रदर्शितरीत्या बहुप्रतिबध्यत्वापत्तिः ।

अपि च आचार्य्यमते कार्य्यतावच्छेदकलाघवं स्फुटतरमेव यत एतन्मते कार्य्यतावच्छेदकघटकतया परामर्शगतबहुतराप्रामाण्यज्ञानानामेकस्यापि प्रवेशो नास्ति । अव्यवहितोत्तरत्वघटितधर्म्मावच्छिन्नकार्य्यतावादिमते तु तादृशसकलाप्रामाण्यज्ञानविरहाणां प्रवेशावश्यकत्वमतस्तन्मते महागौरवम् ।

अथ यन्मते यदाकारज्ञानमनुभवसिद्धं तन्मते ज्ञानेषु तदाकारतानिर्व्वाहार्थं गौरवं न हि दोषाय । अतो व्याप्यवत्त्वाविशेषितानुमितिस्वीकर्त्तृमते गुरुरूपेणापि कार्य्यत्वं नापसिद्धान्तकवलितमिति चेन्न, सर्व्ववादिसिद्धपदार्थस्थल एव गौरवस्यादोषत्वम्, अन्यथा

रत्नकोषकारमतनिरासार्थं विचारस्योद्भावनं अरण्यरोदनवद् वैफल्यमापद्येत । तस्माद् वादप्रतिवादस्थले लाघवमेव तदेकतरमतस्थापकमिति सर्व्वेषां सिद्धान्तः ।

एतेनाव्यवहितोत्तरत्वानुगतत्वपक्षेऽपि साध्यव्यापकावच्छिन्नविशेष्यिका तद्विधेयिका आचार्य्यसम्मतानुमितिरेव समीचीना न त्वपरनैयायिकसम्मता इति समाहितम् । अतएव व्याप्यधर्म्मितावच्छेदकानुमितेरेव युक्तिसम्मततया संशयाकारानुमितिः कदापि न भवितुमर्हति ।

न च प्रागभावस्य दीधितिकाराद्यननुमततया प्रागभावघटितमथुरानाथोक्तोत्तरत्वमप्रसिद्धमतः स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वसत्वाश्रयध्वंसाधिकरणत्वोभयसम्बन्धेन स्वविशिष्टक्षणोत्पत्तिकत्वरूपं गुरुशरीरमप्यव्यवहितोत्तरत्वं परामर्शकार्य्यतावच्छेदकघटकतया प्रवेश्यम् । अतो न सुखदुःखादिभेदेनानन्तकार्य्यकारणभावप्रसक्तिरिति वाच्यम्, स्वक्षणध्वंसाधिकरणक्षणोत्पन्नत्वसत्वाधिकरणसुखवृत्तित्वोभयसम्बन्धेन स्वविशिष्टत्वरूपमनुगतमव्यवहितोत्तरत्वं भवदुक्ताव्यवहितोत्तरत्वापेक्षया लघुशरीरं वक्तुं शक्यते । एवंविधदुःखादिरूपानन्तपदार्थघटितोत्तरत्वमादायानन्तकार्य्यकारणभावस्य दुर्व्वारतापत्तेस्तादवस्थ्यात् ।

मथुरानाथेन सुखदुःखादिभेदेनाव्यवहितोत्तरत्वरत्वस्य सप्तविधत्वमुक्तम्, तच्चापाततः । वस्तुतस्तु पानभोजनमैथुनादिरूपविजातीयकर्म्मजनितानि विजातीयसुखानि, शोकक्षुधाक्षतादिजनितानि विजातीयदुःखानि ध्वनिवर्णात्मकशब्दान्तर्गतविजातीयशब्दादिकानि च

सृष्टिकालात् प्रतिक्षणं जायमानान्यादायाव्यवहितोत्तरत्वानामानन्त्यमनुसन्धेयम्।

विरोधिव्याप्यवत्तानिश्चयाभावस्य दर्शितयुक्त्या कार्य्यकालवृत्तितया कारणत्वावश्यकत्वेन तादृशनिश्चयनिष्ठप्रतिबन्धकतायाः स्वोत्पादोत्तरकालावच्छिन्नत्वविशिष्टाप्रामाण्यग्रहत्वावच्छिन्नानि ज्ञाननिष्ठानि यान्यधिकरणत्वानि तत्तदभावा अवच्छेदकतया निवेश्या, नतु केवलाप्रामाण्यग्रहत्वावच्छिन्नाधिकरणत्वाभावा अपि। एतद्गूढ़रहस्यं दूरदर्शिन एव ज्ञातुं प्रभवन्ति, ग्रन्थगौरवभयेन न लिखितम्।

अनुगमस्तु स्वनिष्ठत्वस्वोत्पादोत्तरकालावच्छिन्नत्वविशिष्टाप्रामाण्यग्रहत्वावच्छिन्ननिरूपकताकत्वोभयसम्बन्धेन ज्ञानविशिष्टाधिकरणत्वसामान्याभावा एव तदवच्छेदका न तु तत्तदधिकरणत्वव्यक्त्यभावकूटत्वेन तादृशप्रतिबन्धकतावच्छेदकत्वम्। सम्बन्धघटकनिरूपकता च स्वाश्रयनिरूपितविशेष्यत्वस्वावच्छिन्नसामानाधिकरण्योभयसम्बन्धावच्छिन्ना ग्राह्या।

यत्तु तदप्रामाण्यग्रहत्वावच्छिन्नाधिकरणत्वाभावमपहाय स्वविशेष्यत्वस्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नाप्रामाण्यग्रहत्वावच्छिन्नप्रतियोगिताकाभावा एव प्रतिबन्धकतावच्छेदकतया परामर्शादिनिष्ठकारणतावच्छेदकतया च निवेश्या, न तु निरुक्ताधिकरणत्वाभावा अपि अनावश्यकत्वात् तत्तुच्छम्,-तादात्म्यान्यवृत्त्यनियामकसम्बन्धानामभावप्रतियोगितावच्छेदकतायाः सिद्धान्तिभिरननुमोदितत्वात्। दर्शितसामानाधिकरण्यघ-

टितोभयसम्बन्धेन कालिकाव्याप्यवृत्तितावच्छेदकीभूत-धर्म्मावच्छिन्नाधिकरणत्वमव्याप्यवृत्ति, अतः कुत्रापि नापत्त्यनुपत्ती। विरोधिव्याप्यवत्तानिश्चयत्वादिना प्रतिबन्धकतास्थल एव स्वोत्पत्तिद्वितीयक्षणावच्छिन्नत्वघटितदर्शितोभयसम्बन्धो वक्तव्यः। परामर्शत्वादिना कारणतास्थले तु केवलाप्रामाण्यग्रहत्वावच्छिन्नाधिकरणत्वमेवाभावप्रतियोगितया प्रवेश्यम् । अतएवाप्रामाण्यग्रहात्मकविरोधि व्याप्यवत्तानिश्चयस्थले तस्य नाशोत्पत्तिक्षण एव विशिष्टबोधोत्पादः स्वीक्रियते, तावता नानुभवविरोधः क्षणविलम्बस्य शपथनिर्णेतव्यत्वादिति सकलग्रन्थकारसम्मतम् ।

वन्हिव्याप्यवानभावव्याप्यवानितिपरामर्शद्वयसम्बलनस्थले महानसीयवह्नौ महानसीयवह्नयभावे च लाघवमितिनिश्चयोत्तरं महानसीयवह्निमान्नवेतिसंशयानुमितिरनिवार्य्यैव, तादृशसामान्यपरामर्शस्य विरोधिव्याप्यनिश्चयत्वाभावेन दीधितिकारव्यवस्थापितप्रतिबन्धकत्वायोगात् । इति गदाधरसन्दर्भेण प्रतिपादितम् ; तदप्यश्रद्धेयमेव ।–यतः कामिनीजिज्ञासायास्तदनिवर्त्तकज्ञानसामान्यं प्रति प्रतिबन्धकत्वम् । एवञ्च घटज्ञानं कामिनीज्ञानञ्च जायतामित्यादयाकारकसमूहालम्बनकामिनीजिज्ञासा तज्जिज्ञासाया अविषयीभूतपटादिज्ञानं प्रत्येव प्रतिबन्धिका न तु घटज्ञानं प्रत्यपि घटज्ञानस्यापि दर्शितसमूहालम्बनकामिनीजिज्ञासानिवर्त्तकत्वात् । दीधितिकारमथुरानाथजगदीशगदाधरप्रभृतिसकलग्रन्थकाराणामियमेव व्यवस्था । एवञ्च लाघवज्ञानसहितदर्शितपरामर्शद्वयसम्बलनस्थले यदा तु कामिनीज्ञानं संशयभिन्नानु-

मितिश्च जायतामितीच्छा जायते तदा संशयात्मकानुमित्यसम्भवेन तादृशविरोधिद्वयविषयकनिश्चयरूपानुमित्यापत्तिः । परोक्तज्ञानस्य परस्परविरोधिद्वयविषयकनिश्चयरूपतायाः सर्वैरेवानङ्गीकारात् । अतस्तादृशेच्छादशायां महानसीयवह्नितदभावयोर्निश्चयात्मकानुमित्यापत्तिवारणार्थं संशयाकारानुमितिमङ्गीकृतवतां कामिनीजिज्ञासाया असत्त्वे यादृशकारणस्तोमद्वयात् संशयाकारानुमितिर्जायते तदेकतरकारणस्तोमस्यापि विपरीतानुमितिप्रतिबन्धकत्वकल्पनावश्यकत्वमतो न तादृशेच्छादशायां दर्शितसाध्यतदभावयोर्निश्चयात्मकानुमितिप्रसङ्गः । ईदृशप्रतिबन्धकबलादेव च तादृशेच्छाविरहदशायामपि न संशयात्मकानुमितिरपि ।

अथ तत्तत्कामिनीजिज्ञासाव्यक्तीनां तादृशपरामर्शनिष्ठकक्षानुमितिकारणतायां उत्तेजकत्वमेव युक्तं निरुक्ताकक्षप्रतिबन्धकताकल्पनाया अयुक्तत्वात् ।

न च तदेकतरपरामर्शस्तादृशकामिनीजिज्ञासा च तदा निश्चयात्मकैकमात्रविधेयकानुमितिः सर्व्वानुभवसिद्धा सा न जायते निरुक्तोत्तेजकाभावविशिष्टपरामर्शासत्त्वादिति वाच्यम्, तादृशेच्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकतया एकमात्रपरामर्शदशायां जायमानतत्तदिच्छाव्यक्तीनामुत्तेजकत्वस्यानावश्यकत्वात् प्रत्युतोत्तेजकतया तत्तद्व्यक्तीनां प्रवेशे गौरवात् इति चेन्न तत्तद्व्यक्तित्वेनेच्छानामुत्तेजकत्वे तत्तदात्मनि तत्समकालोत्पन्नविनष्टानां पवनाद्यनन्तसंयोगव्यक्तीनामपि विनिगमनाविरहेणोत्तेजकत्वापत्त्या एकविधपरामर्शस्यापि बहुकारणत्वापत्तेः । अतो निरुक्तसामग्र्याः प्रतिबन्धकत्वपक्षस्यैव साधुत्वात् ।

न च को हि संयोगो द्वित्रक्षणमात्रस्थायी यमादाय दर्शितविनिगमनाविरहो भवेत् । तथा हि संयोगनाशेऽयं क्रमः,-क्रियातो विभागस्तदनन्तरमेवोत्पन्नसंयोगनाशः । अपरक्रमश्च,-त्रिक्षणादिस्थायिद्रव्यनिष्ठसंयोगानां तत्तद्द्रव्योत्पत्तिद्वितीयक्षण एव संयोगोत्पादस्ततो द्रव्यनाशात् तत्तत्संयोगो नश्यति आश्रितगुणनाशस्याश्रयनाशजन्यत्वात् इति दर्शितक्रमद्वयेऽपि संयोगमात्रस्यैव त्रिक्षणस्थायित्वमर्थवशसम्पन्नं पर्य्यवसितमिति वाच्यम, तावतापि क्षत्यभावात्, यतः कामिनीजिज्ञासाजनकेषूसाधनताज्ञानदशोत्पन्नसंयोगानां तदिच्छास्थितिक्षणपर्य्यन्तस्थायिनामात्मद्व्यणुकादिसंयोगविशेषाणां त्रिक्षणमात्रस्थायित्वेऽपि तत्तत्संयोगमादायापि विनिगमनाविरहशङ्काया अनिवृत्तेः ।

केचित्तु आत्मना सह द्वित्रक्षणमात्रस्थायिद्व्यणुककार्य्यीभूतसंयोगानां नासम्भवः, तेषां क्रियाजन्यत्वाभावेऽपि "कपालतरुसंयोगात् संयोगस्तरुकुम्भयो" रित्यादिवत् स्वावयवात्मसंयोगेन तादृशद्व्यणुकादौ द्वितीयक्षणे संयोगोत्पत्तौ बाधकाभावात् । न च तत्तत्संयोगानां क्षणिकत्वापत्तिभयेन द्वित्रक्षणमात्रस्थायिद्रव्ये संयोगो न प्रामाणिकः; अन्त्यशब्दभिन्नक्षणिकपदार्थानां नैयायिकैरनभ्युपगमेनेष्टापत्तेरयोगात् । तादृशसंयोगस्याप्रामाणिकत्वे च द्वित्रक्षणमात्रस्थायिद्रव्याणां प्रामाणिकत्वे विभूनां सर्व्वमूर्त्तसंयोगानुयोगित्वसिद्धान्तव्याघात इति वाच्यम् तादृशसंयोगस्वीकारेऽपि तेषां क्षणिकत्वाप्रसक्तेः । यतस्ते च संयोगाः स्वाश्रयीभूतद्रव्यस्थितिक्षणेषु उत्पद्यन्ते, तत्तद्द्रव्यनाशोत्तरक्षणेषु नश्यन्ति । एवञ्च तेषामर्थतो द्वित्रक्षणमात्रस्थायित्वपर्य्यवसानमित्याहुः ।

इदन्त्ववधातव्यम्, स्वनाशोत्तरजायमानं स्वस्मिन्नवर्त्तमानं वा स्वसमवेतनाशं प्रति द्रव्यनाशस्य हेतुत्वमिति प्राचीनसिद्धान्तः।

न चाश्रयविनाशेऽपि तद्गतपरिमाणैकत्वादिकं तिष्ठतीति नानुभवेन विषयीक्रियते इति वाच्यम्, यतः खण्डप्रलयादौ जन्यद्रव्यमात्रवृत्तिजातिसत्त्वमेवं शरीरनाशेऽपि देवदत्तत्वादिजातिसत्त्वं यदि भवतां नानुभवविरुद्धं तदा जन्यद्रव्यनाशोत्पत्तिक्षणपर्य्यन्तं स्वसमवेतगुणसत्त्वं कथं नानुभूयते! परन्तु तत्क्षणे यदि तेषां न प्रत्यक्षं तदा तत्कारणीभूतेन्द्रियसंयुक्तत्वविशिष्टनिरूपितसमवेतत्वादिरूपसन्निकर्षाणां कार्य्यकालवृत्तितया कारणतायाः स्वीकार्य्यत्वात्। अतएव स्वसमवायिनाशक्षणे स्वसमवेतप्रत्यक्षं न भवितुमर्हति, तद्घटनाशोत्पादक्षणे घटत्वादिप्रत्यक्षवत्।

न च सादित्वेऽपि कार्य्यद्रव्यचरमकालपर्य्यन्तस्थायिगुणानां घटत्वादेरिव नाशो न स्वीक्रियते इति वाच्यम्, यतो भावनाशं प्रति जन्यभावत्वेन सामान्यतः कारणतायां मुक्तिवादे गदाधरप्रदर्शितायाः क्लृप्तत्वेन तादृशकारणबलात् तादृशगुणनाशस्वीकारावश्यकत्वमिति प्राचीनव्यवस्था न युक्तिसङ्गता। यदि घटनाशेऽपि घटीयगुणसत्त्वं प्रामाणिकं तदा महाप्रलयकालपर्य्यन्तं ते गुणास्तिष्ठन्तु तन्नाशानुरोधेनाश्रयनाशानां दर्शिताक्लृप्तकारणताकल्पनाया अन्याय्यत्वात्। तत्तद्गुणानां महाप्रलयप्राक्क्षणपर्य्यन्तस्थायित्वस्वीकारे तु महाप्रलयप्राक्कालपर्य्यन्तस्थायिनामनन्तपरमाण्वादिभिः सहानन्त-

विभुसंयोगादीनामनन्तपार्थिवपरमाणुगतानन्तरूपरसगन्धादीनाञ्च नाशकक्षणकारणेनैव तत्तद्गुणनाशसम्भवात्। अनन्तचरमध्वंसात्मकमहाप्रलयनिष्ठकार्य्यत्वमदृष्टवदन्यध्वंसत्वेनादृष्टवत्त्वं कालिकसम्बन्धेन जन्यमात्रस्यैव कालत्वात् तादृशरूपावच्छिन्नकार्य्यं प्रति कारणत्वं तु अदृष्टवत्समयप्रागभाववदन्यसमयत्वेन अनन्ततत्तत्समयत्वेन वा इति यथा तथास्तु।

यदि च दिनान्तरे विनष्टानां जन्यद्रव्याणां रूपपरिमाणरसादिकमद्य नास्तीतिव्यवहारस्य प्रामाणिकत्वरक्षायै स्वनाशकालीनस्वसमवेतगुणनाशं प्रति द्रव्यनाशनिष्ठाया अक्षुण्णाया अपि कारणतायाः कल्पनावश्यकत्वमित्युच्यते तदा घटाद्यसत्त्वे तदीयरूपादिकं न तिष्ठतीतिव्यवहारस्यापि किं न प्रामाणिकत्वमतस्तादृशव्यवहारस्यापि निर्वाहार्थं द्रव्यनाशकसामग्र्या एव द्रव्याश्रिततत्तद्गुणानां नाशकत्वकल्पनाया युक्तत्वात्। यतः फलमुखगौरवं न खलु दोषाय तत्तद्घटाद्युत्पादकसामग्यास्तदीयप्रागभावनाशकत्ववत्।

एतेनावयविनाशं प्रति अवयवसंयोगनाशस्य हेतुत्वं न युक्तिपथमारोहति, अवयवद्वयसंयोगनाशकाले घटसत्त्वस्यानुभवविरुद्धत्वात्। तस्मात् तत्रापि अवयवसंयोगनाशकसामग्र्या एव अवयविनाशकतायाः स्वीकारस्यौचित्यात्। अतो द्व्यणुकादिद्रव्याणां तत्तद्गुणस्य क्षणिकत्वप्रसङ्गभयेन तादृशद्रव्यस्याप्यप्रामाणिकत्वम्। इत्यस्माकं व्यवस्था।

यद्वाक्यं श्रुतिषु श्रुतं स्मृतिगतं यच्चागमादौ स्थितं
तत्तद्वाक्यविरोधि किञ्चन वचो नोक्तं न चासङ्गतम्।

को दोषस्त्वदवहेलया कतिपयानाप्तैर्नवाविष्कृते
भो भो भ्रातरतोऽत्र मास्तु भवतोऽनास्था व्यवस्थापिते ॥

अथ तत्तदनन्तसंयोगानामुत्तेजकत्वापत्तिभयेन यदि तादृशकामिनीजिज्ञासाव्यक्तीनां नोत्तेजकत्वं तदा तद्भयेन तादृशेच्छायास्तत्तद्व्यक्तित्वेन तदनिवर्त्तकज्ञानप्रतिबन्धकत्वमपि कथमिति चेन्न तादृशेच्छोत्तरं स्वानिवर्त्तकफलानुत्पादस्य सर्व्ववादिसम्मततया विनिगमनाविरहेण संयोगव्यक्तीनामपि प्रतिबन्धकताया अगत्या स्वीकार्य्यत्वात् ।

वस्तुतस्तु तादृशेच्छाया अनुगतरूपेणैव प्रतिबन्धकत्वं वाच्यम्, अनुगमाकारस्तु संशयान्यत्वविशिष्टकामिनीजिज्ञासात्वम्, वैशिष्ट्यं च स्वनिष्ठप्रकारतानिरूपितानुमितित्वावच्छिन्नविशेष्यतानिरूपकत्वसम्बन्धेन बोध्यम् । प्रतिबध्यतावच्छेदकत्वं तु संशयान्यानुमितिभिन्नत्वे सति कामिनीज्ञानभिन्नज्ञानत्वम् । न चानुमितौ संशयत्वानङ्गीकृतये संशयभेदावच्छिन्नत्वं तादृशप्रतियोगितायामप्रसिद्धं गुरुधर्मेषु प्रतियोगितावच्छेदकत्वानङ्गीकारात् इति वाच्यम्, यतो दीधितिकारेण युक्त्या गुरुधर्मेषु प्रतियोगितावच्छेदकत्वं व्यवस्थापितम्, न हि युक्तिसिद्धानि वस्तूनि कोऽपि खण्डयितुं प्रभवेत् ।

किञ्च संशयभिन्नानुयोगिकसमवायसम्बन्धेनानुमितित्वाभावस्य तत्प्रतिबध्यतावच्छेदकत्वोपगमात्, गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽपि गुरुसम्बन्धस्य प्रतियोगितावच्छेदकत्वे विवादाभावात् । अथवा निवर्त्तकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन तादृशानुगतेच्छावत्त्वं प्रतिबध्यतावच्छेदकम् ।

अनुगमस्य निष्कर्षः सुधीभिः करणीयः । अव्यवहितोत्तरत्वसम्बन्धेन तादृशानुगतेच्छाविशिष्टान्यज्ञानत्वं वा प्रतिबध्यानुगमकम् ।

अथैतादृशानुगतधर्मावच्छिन्नकामिनीजिज्ञासायाः-परामर्शनिष्ठजनकतायामुत्तेजकत्वमेवास्ताम्, न तु प्रागुक्तं सामग्रीत्वेन प्रतिबन्धकत्वमिति चेन्न लाघवज्ञानघटितायाविरुद्धयोरेकमात्रस्यानुमितिसामग्याः सत्त्वदशायां तदनुमित्यनुत्पादापत्तेः ।

अथ संयोगव्यक्तिभिः सह विनिगमनाविरहेण मास्त्विच्छाव्यक्तीनां परामर्शनिष्ठकारणतायामुत्तेजकत्वं परन्तु तत्तत्परामर्शव्यक्तिभेदानां परामर्शनिष्ठकारणतायामुत्तेजकत्वं वक्तव्यम् । न च भेदानामुत्तेजकत्वकल्पेऽपि तत्तत्परामर्शव्यक्तिनिष्ठानामनन्तप्रकारताविशेष्यतानिरूपकत्वव्यक्तीनामभावैः सह विनिगमनाविरहो दुर्व्वार इति वाच्यम्, भेदत्वस्याखण्डोपाधित्वमते तत्प्रतियोगितायां सम्बन्धावच्छिन्नत्वानिवेशेन निरुक्तप्रकारत्वादिव्यक्तीनामत्यन्ताभावापेक्षया लघुशरीरतया दर्शितभेदानामेवोत्तेजकत्वादिति चेन्न संशयान्यानुमितिः प्रत्यक्षं कामिनीज्ञानञ्च जायतामित्याकारकेच्छोत्तरं गदाधरप्रदर्शितलाघवज्ञानघटितपरामर्शद्वयात्मकमानसप्रत्यक्षरूपमेकतरपरामर्शांशे भ्रमत्वव्यापकज्ञानं तदनन्तरं भ्रमत्वानुमितिस्ततो भ्रमत्वग्रहानास्कन्दितापरपरामर्शात् तदेकतरविपरीतविधेयकनिश्चयात्मकानुमितिरुभयवादिसिद्धैव । ईदृशस्थले तत्परामर्शव्यक्तेरप्युत्तेजकत्वे तदनुमित्यनुपपत्तिः । तस्यानुत्तेजकत्वे तु निरुक्तभ्रमत्वानुमित्युत्पादक्षणे विरोधिद्वयविधेयकनिश्चयरूपानुमित्यापत्तिर्गीर्व्वाणगुरुणापि

वारयितुं न शक्येत । अतः प्राग्व्यवस्थापितलाघवज्ञानघटितविरोधिसामग्र्यामनुमितिप्रतिबन्धकत्वकल्प एव साधीयान् । एवं रीत्यैव शाखावच्छिन्नोवृक्षः कपिसंयोगवान्न वा उत्पत्तिकालावच्छिन्नो घटो गन्धवान् न वेत्याकारकसंशयानुमितिर्निरसनीया । अन्यत्र तु केवलविरोधिव्याप्यनिश्चयत्वेन प्रतिबन्धकत्वसंस्थापिकाप्युक्तैव युक्तिः ।

अथ लाघवज्ञानघटितायां महानसीयवह्नितदभावाद्येकतरानुमितिसामग्र्यास्तदपरविधेयकानुमितिप्रतिबन्धकत्वकल्पनं न हि सम्भवति, यतः सा च सामग्री पक्षताघटिता, पक्षता चासंख्यानुमितसाध्यव्यक्तिविरहघटिता । एवं च तत्तत्कामिनीजिज्ञासाव्यक्तीनामुत्तेजकत्वपक्षे परमाण्वादिसंयोगव्यक्तीरुपादाय यदापत्तिरभिहिता पक्षता प्रविष्टतत्तदनुमित्साध्यक्तीनां सिद्धिनिष्ठसाध्यानुमितिप्रतिबन्धकतायामुत्तेजकतापक्षे किं नैषापत्तिर्जागर्त्ति ? परन्तु सामग्रीत्वरूपगुरुशरीरावच्छिन्नाकुक्षप्रतिबन्धकत्वकल्पनमधिकमिति चेन्न सामग्रीत्वेन प्रतिबन्धकत्वकल्पे तद्घटकतया पक्षतायाः अप्रवेशात् । यत एककोटेः सिद्धिसत्त्वे विरोधिकोट्यनुमितिर्न सम्भवति, तत्सिद्धे विरोधिकोटिबाधनिश्चयविधया प्रतिबन्धकतया तदानीं विरोधिकोट्यनुमितेरसम्भवात् । वस्तुतः सामग्रीशरीरे पक्षताप्रवेशो यदि क्रियते तदापि न किमप्यनिष्टम् । यतः प्रकृतपक्षसाध्यकानुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावदभावत्वेनैव सामग्रीशरीरे सा निवेश्यते न तु तत्तदनुमित्साध्यक्तिविरहघटिताभावत्वेनापि ।

अथ तथापि जगति यावद्धर्म्माः प्रामाणिकास्तत्तत् प्रत्येकावच्छिन्नस्यैव यत्किञ्चिद्धर्म्मावच्छिन्नपक्षकयत् किञ्चिद्धर्म्मावच्छिन्नसाध्यकानुमितौ लिङ्गत्वं निर्व्ववादम्, सुतरां तत्तद्रूपावच्छिन्नविषयकानां भ्रमप्रमान्यतरात्मकपरामर्शानां सामग्रीविधया पृथक्पृथक्प्रतिबन्धकत्वकल्पनावश्यकत्वम्। एवञ्चानुमितिसामग्र्याः प्रतिबन्धकत्वपक्षे तत्तत्कामिनीजिज्ञासाव्यक्तीनामनन्तपरमाणुसंयोगव्यक्तीनां च तत्तद्व्यक्तित्वावच्छिन्नविषयत्वघटितधर्म्मावच्छिन्नानन्तप्रतिबन्धकत्वकल्पनं किं नायातम्? परन्तु सामग्रीरूपेण तत्कल्पनं गुरुधर्म्मावच्छिन्नत्वापत्तिरूपदोषकवलितमिति चेन्न सकलपरामर्शानां तत्पक्षकतत्साध्यकानुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकतापर्य्याप्त्यधिकरणधर्म्मवत्त्वेनैव निवेशनीयत्वात्। अत एवासङ्गतो गदाधरस्य सर्व्व एव विचारः। सुसङ्गतञ्चानुमितौ संशयत्वानङ्गीकृदीधितिकारमतम्।

"बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥"

अथ संशयान्यानुमितिविषयककामिनीजिज्ञासोत्तरविरोधिद्वयविषयकसंशयभिन्नानुमित्यापत्तिवारणार्थमतिगुरुणा विरोधिपरामर्शत्वादिना निरुक्तप्रतिबन्धकत्वं न कल्पनीयम, परन्तु विरोधिद्वयविषयकानुमितित्वेन प्रतिबध्यत्वं तादृशकामिनीजिज्ञासात्वेन च लघुना प्रतिबन्धकत्वमेव युक्तम्। एवञ्च तादृशेच्छोत्तरं न निरुक्तानुमितेरापत्तिः सम्भवतीति चेन्न अव्याप्यवृत्तित्वज्ञानकाले तादृशेच्छासत्त्वेऽपि विरोधिद्वयविषयकनिश्चयात्मकानुमितेः सर्वसम्मतत्वेन भवदुक्तप्रतिबध्यप्रतिबन्ध-

कभावासम्भवात् । अनुमितिसामग्र्याः प्रतिबन्धकत्व-पक्षे चाव्याप्यवृत्तित्वज्ञानस्य प्रतिबन्धकतायामुत्तेजक-त्वकल्पनेन वानुपपत्त्यापत्ती ।

न चैतन्मतेऽपि कामिनीजिज्ञासानिष्ठप्रतिबन्धक-तायां तस्योत्तेजकत्वमेव कल्पयितुमुचितमिति वाच्यम्, तथा सत्यतिलाघवेनाव्याप्यवृत्तित्वज्ञानाभावविशिष्ट-सविषयकत्वादिनैव प्रतिबन्धकत्वस्य कल्पयितुमौचित्या-पत्तेः, इष्टापत्तौ रत्नकोषकारमतं रत्नवत् परिरक्षितुं कथं प्रभविष्यसि ।

किञ्च विरोधिद्वयविषयकत्वसहितानुमितित्वस्य निरुक्तकामिनीजिज्ञासाविरहकार्य्यतावच्छेदकत्वे कारण-स्यैव स्वकार्य्यजननप्रयोजकसामग्रीघटकतानैयत्येन तत्-कार्य्यत्वेनासंगृहीतानां विरुद्धयोरेकतरमात्रविषयकानु-मितीनां कारणीभूतयादृशसमाजात् तादृशानुमितयो जायन्ते निरुक्तकामिनीजिज्ञासाकाले तादृशसमाजस्यापि सम्भवेन तदुत्तरानुमित्युत्पादापत्तेर्व्वारयितुं गीर्वाण-गुरोरप्यशक्यत्वात् । न ह्येवं कोऽपि भवन्मते कारणवि-शेषोऽस्ति य एकमात्रविषयकानुमितिमात्रनिष्ठकार्य्यता-निरूपितकारणताश्रयीभूततादृशानुमितिमात्रजननप्रयो-जकघटको भवेत् । अतस्तल्लिङ्गकप्रकृतसाध्यकप्रकृतपक्ष-कानुमितीनां परामर्शादिकारणकूट एव तादृशानुमिति-जननप्रयोजकत्वम्, न प्रागुक्तैकमात्रविषयकानुमित्यका-रणं निरुक्तकामिनीजिज्ञासाविरहोऽपि । तदकारणस्यापि तदुत्पत्तिप्रयोजकसामग्रीघटकत्वे कारणतामात्रस्यैवोच्छे-दप्रसङ्गः, कारणत्वानङ्गीकारेऽपि समाजविशेषे फलजनक-त्वप्रयोजकत्वस्वीकारेणैव सर्व्वसामञ्जस्यसम्भवात् । एवं

च निरुक्तकामिनीजिज्ञासाकालेऽपि लाघवज्ञानपक्षतावाधनिश्चयाभावपरामर्शात्मकसमाजस्य जागरूकत्वेन तादृशेच्छोत्तरमनुमित्युत्पादापत्तेः कथमप्यवारणात् । तस्मान्निरुक्तविरुद्धसामग्रीत्वेनैव प्रतिबन्धकत्वं न तत्तदभावोभयविषयकानुमितित्वावच्छिन्नं प्रति कामिनीजिज्ञासात्वेन । इत्येवास्तामलमतिविस्तरेण ।

प्रत्यक्षान्यज्ञानत्वेन प्रतिबध्यत्वसंस्थापिका युक्तिः प्राग् दूषितैव । परन्त्वनुमितौ संशयत्वमनङ्गीकुर्व्वतः सकलग्रन्थकारापेक्षया परमश्रद्धास्पदीभूतस्य दीधितिकृतो मतपोषकानुमितिसाधारणविरोधिव्याप्यवत्तानिश्चयनिरूपितप्रतिबध्यत्वसंस्थापनमवश्यमेव कर्त्तव्यम । अतोऽस्माकं तत्स्थापकयुक्त्युद्भावनप्रयासो युक्त एव । ज्ञानभेदेन विषयताभेदमताश्रयणेन समानाकारकसमानजातीयज्ञानानां विषयतायाः सिद्धान्तिसम्मतत्वेन च प्रत्यक्षान्यज्ञानवृत्त्युपलक्षितं तद्धर्म्मावच्छिन्नप्रकारतानिरूपिततद्धर्म्मावच्छिन्नविशेष्यत्वं तादृशविशेष्यतानिरूपितातादृशप्रकारत्वं च विनिगमनाविरहेण प्रतिबध्यतावच्छेदकद्वयमेवास्तां तद्धर्म्मोपलक्षितस्य प्रतिबध्यतावच्छेदकत्वस्थले तद्धर्म्मविशिष्टप्रतियोगिकत्वाविशेषितं शुद्धतत्तत्सम्बन्धस्य प्रतिबध्यतावच्छेदकतावच्छेदकसंसर्गविधया प्रवेशेन लाघवात्, न तु गदाधरोक्तं तादृशविशेष्यतात्वालिङ्गानवृत्तित्वप्रत्यक्षान्यत्वमपि प्रतिबध्यतावच्छेदकमिति । तथा सति तादृशविशिष्टभेदप्रतियोगिकत्वसहितस्वरूपत्वेन प्रतिबध्यतावच्छेदकतानिरूपितसांसर्गिकावच्छेदकतायाः प्रवेशावश्यकत्वेन महागौरवापत्तिः । विशिष्टत्वेन भानस्थले विशिष्टप्रतियोगिकत्वेन

संसर्गत्वं तत्तद्धर्म्मोपलक्षितभानस्थले तु तत्तद्धर्म्मविशिष्ट-प्रतियोगिकत्वाविशेषितेन धर्म्मेण तदभानमिति गदाधरेणैवानुमितिग्रन्थे स्वहस्तितम्। तादृशबुद्धिवृत्तित्वोपलक्षितप्रत्यक्षान्यत्वस्य प्रतिबध्यतावच्छेदकत्वे प्रत्यक्षभिन्नानां घटपटादिविषयकज्ञानानां बह्वयभावव्याप्यादिनिश्चयप्रतिबध्यत्वापत्तिः। विषयविशेषमनिवेश्य दर्शिततत्तत्पुरुषीयत्वघटितरूपेण प्रतिबध्यत्वमताश्रयणेऽपि स्वाश्रयभेदेन वृत्तिताया भिन्नत्वमते उक्तयुक्त्या प्रत्यक्षभिन्नबुद्धिवृत्तित्वोपलक्षितं तत्तत् समवेतत्वं तत्तत्पुरुषनिरूपितं सामान्यतो दृष्टित्वं वा प्रतिबध्यतावच्छेदकम्, न तु तत्तत्पुरुषीयबुद्धिवृत्तित्वोपलक्षितं प्रत्यक्षान्यत्वम्,—दर्शितयुक्तेः। एवंच शाब्दत्वोपमितित्वे अन्तर्भाव्य प्रतिबध्यत्वकल्पने तदाधिक्यकल्पनानिबन्धनगौरवं स्फुटमेव।

अथ वा प्रथमकल्पे दर्शितविषयताशालिज्ञानानुयोगिकस्वरूपसम्बन्धेन प्रत्यक्षभेदत्वमात्रेण प्रतिबध्यतावच्छेदकत्वम्, द्वितीयकल्पे तु प्रत्यक्षभिन्नानुयोगिकस्वरूपसम्बन्धेन तत्तत्पुरुषवृत्तित्वमात्रं प्रतिबध्यतावच्छेदकम्-न तु प्रत्यक्षभिन्नज्ञाननिष्ठनिरूपकत्वसम्बन्धेन तादृशप्रकारतानिरूपिततादृशविशेष्यत्वादिकं तत्तत्पुरुषीयज्ञानानुयोगिकस्वरूपसम्बन्धेन प्रत्यक्षान्यज्ञानत्वं वा गुरुशरीरस्य धर्म्मविधयाऽवच्छेदकानुप्रवेशे तादृशधर्म्मघटकानां प्रत्येकव्यक्तेः सम्बन्धप्रवेशावश्यकतया महागौरवं स्यात्। अतो लघुशरीरस्य धर्म्मविधयाऽवच्छेदकत्वमेव युक्तम्, संसर्गतावच्छेदकीभूतधर्म्माणां बाहुल्येऽपि तत्तद्धर्म्माणां पुनः संसर्गानिवेशेन लाघवम्। एतेन प्रत्यक्षशाब्दादि-

साधारणसमानाकारकज्ञानोयविषयताया ऐक्येऽपि आधेयभेदेऽप्याधेयताया ऐक्येऽपि च विनिगमनाविरहेण प्रथमकल्पे गुरुधर्म्मावच्छिन्नप्रतिबध्यताद्वयस्यापत्तिरिति निरस्तम् ।

अथ सम्बन्धघटकधर्म्माणां संसर्गानिवेशेन यदि लाघवं तदा दर्शितविशेष्यत्वादिनिरूपकप्रत्यक्षान्यप्रतियोगिकसमवायसम्बन्धेन समान्यतो बुद्धित्वेनैव प्रतिबध्यत्वमास्तामिति चेत् तदेव स्वीकुरुत । वस्तुतस्तु तथास्वीकारे नित्यज्ञानेऽपि जन्यत्वव्यवहारापत्तिभयेन लाघवेऽपि तादृशप्रतिबध्यताकल्पनं न हि सम्भवेत् । इष्टापत्तौ भावनाशं प्रति जन्यभावत्वेन सामान्यतः कारणत्वस्य मुक्तिवादे गदाधरप्रदर्शितत्वेन नित्यज्ञाननाशापत्तिर्दुर्वारैव ।

न च तत्र जन्यपदं प्रागभावप्रतियोगिपरं यत् किञ्चित्कालावृत्तिपरं वा अनन्यथासिद्धव्यापकत्वादिघटितजन्यत्वस्य प्रवेशे महागौरवादिति वाच्यम्, दीधितिकृता स्वप्रणीतपदार्थखण्डने जन्यजनकभावस्य स्वरूपसम्बन्धविशेषात्मकपदार्थान्तररूपतायाः स्वहस्तितत्वेन जन्यत्वेन लघुधर्म्मेणैव भावनिष्ठजनकताकल्पनाया युक्तत्वात ।

अथोत्पद्यमानवस्तुनिष्ठपदार्थान्तरमात्रस्यैव किञ्चिज्जन्यतावच्छेदकतया सिद्धिनियमेन जन्यत्वस्य कथं पदार्थान्तरतेति चेन्न सामान्यतो जन्यत्वावच्छिन्नं प्रति कालत्वेन अदृष्टत्वेन कृतिमत्त्वेन च कारणत्वस्य सर्वसम्मततया तत्तत्कार्य्यतावच्छेदकविधया तत्सिद्धेरावश्य

कत्वात्। अन्यथा उक्तसामान्यकार्य्यकारणभावस्य विलयप्रसङ्गः । यतोऽनन्यथासिद्धत्वघटिततत्तद्धर्म्मघटितव्यापकताघटितपदार्थानां जन्यतारूपत्वे तेषामननुगततया सामान्यतो जन्यत्वेन दर्शितजन्यत्वानि उच्छिद्येरन्।

न च तत्र तत्र प्रागभावप्रतियोगित्वेनैव कालादिकार्य्यत्वं कल्पनीयमिति वाच्यम्, कार्य्यतावच्छेदकलाघवानुरोधेन जन्यतायाः कल्पनावश्यकत्वात्। विजातीयस्पर्शगन्धसमवायिकारणतावच्छेदकतया क्षितित्वसिद्धिवत्। अन्यथा क्षुण्णगन्धप्रागभाववत्त्वेन गन्धकारणतासम्भवात् तदवच्छेदकतया क्षितित्वजातिसिद्धिर्न स्यात्। कारणतावच्छेदकतयैव पदार्थः सिध्यति न तु कार्य्यतावच्छेदतयापीति त्वज्ञानामाज्ञामात्रम्, सा तु विज्ञानामवज्ञास्पदमेव,तृणारणिमणिजन्यतावच्छेदककतया वह्निगतवैजात्यसिद्धेः सर्व्वसम्मतत्वात्।

अथ वा सकलजन्यत्वानामखण्डानुगतमेकं जन्यतात्वं नानाविधानां प्रतियोगित्वानां तथाविधानां प्रकारत्वसंसर्गत्वविशेष्यत्वादीनां चानुगतप्रतियोगितात्वादिवत्, तथाविधप्रकारतात्वादिवच्च। अत एवानन्यथासिद्धनियतपूर्व्ववर्त्तिताघटितपदार्थानामननुगतानां विविधानां जन्यतारूपतायाः साम्प्रदायिकत्वेऽपि तादृशसकलजन्यतागतमेकमेव जन्यतात्वमिति सिद्धान्तः साम्प्रदायिकव्यवस्थां न विरुणद्धि। अत एव च ज्ञानत्वव्याप्यजातिघटितजन्यत्वानामननुगतत्वेऽपि जन्यप्रत्यक्षसामान्ये एकैककारणत्वेोपपत्तिरपि।

न चाखण्डजन्यतात्वेन स्वरूपसम्बन्धेन निखिलज-

जन्यतावच्छेदकत्वं भवता कल्प्यते, तदपेक्षया प्रतियोगितासम्बन्धेनाखण्डप्रागभावत्वेन कृत्स्नेनैव जन्यतावच्छेदकत्वमुचितम्, त्रयोः समशरीरत्वात् । प्रागभावत्वं नाखण्डोपाधिः परन्तु भावभिन्नध्वंसप्रतियोगित्वं वा तत्, अतस्तादृप्येण जन्यतावच्छेदकत्वकल्पनं गौरवदोषकवलितमिति नाशङ्क्यम्, यया युक्त्या कारणतया प्रागभावसिद्धिस्तया तु कारणतावच्छेदकत्वेन प्रागभावत्वस्याखण्डस्य सिद्धेरवश्यकत्वादिति वाच्यम्, प्रतियोगित्वेन सम्बन्धेन प्रागभावस्य जन्यतावच्छेदकत्वे नित्यस्य जन्यतापत्तेः, स्वात्यन्ताभावे स्वभेदे च प्रतियोगितासम्बन्धेन प्रागभावसत्त्वात् । नित्यनिष्ठप्रतियोगिताव्यावर्त्तकविशेषणदाने तु गौरवं स्यात् । तस्माद् दर्शितकार्य्यतावच्छेदकतावच्छेदकतया जन्यतागताखण्डजन्यतात्वकल्पनं युक्तिपथमारोहति । जनकतात्वं तु जन्यतानिरूपकत्वं न तु तदप्यखण्डोपाधिस्तत्साधकयुक्तेरसत्त्वात् । एतेन भावत्वमपि व्याख्यातम्, अनयैव रीत्या सत्तारूपजातिसिद्धिरपि व्याख्याता । जन्यसत्तावच्छिन्नं प्रति सामान्यतो द्रव्यत्वेन कारणतायाः कृत्स्नत्वेन तत्कार्य्यतावच्छेदकतया सत्तारूपजातिसिद्धेरावश्यकत्वात् ।

न च जन्यभावत्वेनैव तत्कार्य्यत्वमास्तां न त्वखण्डसत्ताघटितेनापि इति वाच्यम्, अतिरिक्तानां पदार्थान्तराणां क्षणसम्बन्धादीनां भावानां समवायसम्बन्धाधेयतारूपप्रत्यासत्तिशून्यतया तत्साधारणस्य जन्यभावत्वस्य कार्य्यतानवच्छेदकत्वात्; न ह्यतिप्रसक्तमवच्छेदकमितिनियमात् ।

अथैतावता जन्यमात्रे सत्ता वर्त्ततां तस्या कथं नित्येष्वपि सिद्धिरिति चेन्न नित्यानित्यसाधारणपृथिवीत्वद्रव्यत्वश्वेतत्वस्पर्शत्वमाधुर्य्यत्वादिभिः समं साङ्कर्य्यापत्तिभयेन कल्पितेषु नित्येष्वपि दर्शितकार्य्यतावच्छेदकतया सिद्धायास्तस्याः कल्पितत्वेन समवायसम्बन्धेनाधेयताकल्पनायामकल्पितकल्पनानिबन्धनदोषास्पर्शनात्।

अथैवमपि भावनाशं प्रति जन्यभावत्वेन हेतुत्वमिति गदाधरेण स्वहस्तितम्। तादृशकार्य्यकारणभावावच्छेदकतया अखण्डभावत्वं यदि सिध्येत्, भावव्यवहारानुरोधेन जन्यभावेष्विव नित्यभावेष्वप्यखण्डभावत्वसत्त्वं तदैव सम्भवदुक्तिकं भवेत्; दर्शितकार्य्यकारणभावावच्छेदकतया तत्सिद्धिरेव भवितुं नार्हति, सत्तारूपलघुधर्म्म एव तादृशावच्छेदकत्वस्वीकारादितिचेन्न पक्षताग्रन्थोयसार्व्वभौमोक्तपक्षतादूषणविचारप्रकरणे दीधितिकारादिभिः क्षणानां ततसम्बन्धानां वाऽतिरिक्तायाः स्वहस्तिततत्वेन तादृशभावानां नाशोपपत्तये भावत्वेन निरुक्तकार्य्यकारणभावस्वीकारावश्यकत्वात्, द्रव्यगुणक्रियानात्मकतया तेषां 'सद्' व्यवहारविषयत्वाभावेन तत्र सत्ताजातिस्वीकारासम्भवात्।

अथ तत्प्रकारकजन्यप्रमासामान्यकारणतयाऽभिमतः को हि गुणपदपरिभाषितः? न तावत् प्रमाप्रकारीभूतो धर्म्मः; तथा सति भाविनष्टप्रकारक प्रमाया उच्छेदापत्तिः प्रमोत्पत्तिप्राक्क्षणे तत्कारणीभूतप्रकाराणामसत्वादिति चेन्न तत्प्रकारतानिरूपितविशेष्यतासम्बन्धेन भगवतो ज्ञानव्यक्तेरेव हेतुत्वं तत्रैव च गुणापदार्थत्वमिति सर्व्वसामञ्जस्यात्।

अथ कालिकाव्याप्यवृत्तीनां प्रकारतास्थले भवतु भगवज्ज्ञानस्य प्रमाकारणत्वम्, परन्तु तदन्यनिखिलधर्म्मप्रकारत्वस्थले लाघवेन तत्तद्धर्म्माणामेव तत्प्रकारकप्रमाकारणत्वमास्तामिति चेन्न व्याप्यवृत्तीनामप्यचिरन्तनव्यक्तिप्रकारकप्रमां प्रत्यपि नित्यज्ञानव्यक्तेरेव कारणत्वावश्यकत्वात् । अन्यथा कदाचिद् धर्म्मसत्त्वेन तद्गतासाधारण्याप्यवृत्तिधर्म्माणामप्यसत्त्वात् तदानीं तत्प्रकारकप्रमानुत्पत्तिप्रसङ्गो दुर्व्वारः । चिरस्थायिव्यक्तिप्रकारकप्रमास्थले तु तत्तद्व्यक्तीनां गुणविधया कारणत्वस्वीकारे वयं न विवदामहे ।

अथ कार्य्यकारणभावावच्छेदकलाघवानुरोधेन यदि पदार्थान्तरं सिध्येत् तदा शाब्दजनकतावच्छेदकतया वाच्यवाचकभावे पदार्थान्तरता कथं न स्यात् ? भगवदिच्छाघटितपदार्थस्य शाब्दकारणतावच्छेदकत्वे महागौरवादिति चेन्न यतः शब्दानां जन्यतया तन्मात्रगतस्य वाचकत्वस्य पदार्थान्तरत्वं चेत् तादृशवाचकत्वस्य स्वावच्छिन्नकारणप्रयोज्यत्वावश्यकत्वापत्तिः, केवलजन्यगतविवादास्पदीभूतपदार्थमात्रस्यैव स्वावच्छिन्नकारणप्रयोज्यत्वनियमात् ।

अपि च परिभाषाज्ञानवाचकताज्ञानयोरेकरूपेणैव शाब्दकारणत्वमिति शक्तिवादग्रन्थे गदाधरेणैव लिखितम् । अयं भावः,—परिभाषा शास्त्रकारीयेच्छाविशेषरूपा, वाचकतारूपशक्तिस्तु भगवदिच्छा तद्विषयत्वं वा । शाब्दकारणतावच्छेदकशरीरे तु शास्त्रकारीयत्वमीश्वरीयत्वं च न निवेश्यम्, तदुभयोरेककारणतायां लाघवात् ।

एवञ्च भगवतोऽपि वाचकतारूपविशिष्टेच्छा निरुक्तकल्पकारणतावच्छेदकतया सिध्यति । वाचकतायाः पदार्थान्तरत्वे वाचकताज्ञानपरिभाषाज्ञानयोः शाब्दकारणताद्वयापत्तिः । एतेन शब्दानां नित्यतया तन्मात्रवृत्तिवाचकताया दर्शितयुक्त्या कारणाप्रयोज्यत्वेऽपि क्षत्यभावादिति निरस्तम् ; वाचकताज्ञानपरिभाषाज्ञानयोः कारणताद्वयापत्तेर्वज्रलेपत्वात् । एतेन पदधर्म्मिकतत्तदर्थविषयकबोधजनकत्वप्रकारकेच्छाविषयताया इव पदविशेष्यकतत्तदर्थविषयकशाब्दजनकताप्रकारकज्ञानविषयताया अपि विनिगमनाविरहेण कथं न वाचकत्वरूपत्वं कथं वा न तादृशविषयविषयकज्ञानद्वयस्य शाब्दजनकत्वमित्याशङ्कापि निराकृता ।

न च शास्त्रकार्यीयेच्छारूपनिरुक्ताकारकपरिभाषाया इव तदीयतदाकारकज्ञानस्यापि विनिगमनाविरहेण कथं न परिभाषापदार्थत्वं ? यतः परिभाषा पारिभाषिकपदघटितवाक्यश्रोतुर्न प्रत्यक्षविषयो यद्बलेन तस्या इच्छारूपतैव भवेदिति वाच्यम, तस्यास्तत्तत्पुरुषस्य प्रत्यक्षविषयत्वेऽपि लाक्षणिकपदेषु पारिभाषिकत्वव्यवहारस्य सर्वैरेवास्वीकृतत्वेन परिभाषाया निरुक्तेच्छारूपत्वावश्यकत्वात् । अभ्रान्तानां लक्षणाज्ञानं विनापि लाक्षणिकपदेषु तत्तदर्थविषयकशास्त्रकारीयशाब्दजनकत्वरूपवृत्तिज्ञानात् शाब्दबोधापत्तेश्च । यतस्तत्तत्पदेषु लक्ष्यार्थीभूततत्तदर्थविषयकशाब्दजनकत्वं भवता स्वीक्रियते ।

अथ लाक्षणिकत्वं न स्वीक्रियते इति चेन्न तथा सति द्वन्द्वभिन्नापरसकलसमासापेक्षया कर्मधारयस्य

प्राधान्यमितिसिद्धान्तव्याघातापत्तेः । निषादस्थपतिं याजयेदितिश्रुतिवाक्यस्य मीमांसकैः कर्म्मधारयसमासत्वानवधारणानुपपत्तेश्च । यतः समासान्तराणां लाक्षणिकत्वनिबन्धनमेव दौर्ब्बल्यम्, तदसत्त्वे च तेषां दुर्ब्बलत्वं न स्यात् । सत्प्रतिपक्षविभाजकलक्षणविचारस्य गदाधरप्रदर्शितस्यासामञ्जस्यं पश्यत । दीधितिकारपङ्क्तिस्थितपक्षसाध्यग्रहाविरोधीत्यंशलब्धपक्षग्रहाविरोधित्वस्य पक्षतावच्छेदकावच्छिन्नविषयकानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानवच्छेदकत्वमितिनिष्कर्षं कृत्वा स्वरूपतः पक्षतावच्छेदकानुमितित्वव्यापकप्रतिबध्यत्वाप्रसिद्धिमाशङ्क्य कामिनीजिज्ञासानिरूपितप्रतिबध्यत्वे तादृशानुमितित्वव्यापकत्वप्रसिद्धिः कृता गदाधरेण ।

अत्र महद् रहस्यम्,—गुरुशरीरव्यापकत्वनिवेशः किं गदाधरस्य स्वप्नलब्धः ? यतः सूक्ष्मदर्शिनः पश्यन्ति पक्षविषयकयत्किञ्चिदनुमितिविरोधित्वाभावनिवेशनेनैव दीधितिकारोक्तेर्निर्दोषिताम् । अनुगमस्तु स्वनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वसम्बन्धावच्छिन्नावच्छेदकताकभेदवत्त्वसम्बन्धेन पक्षविषयकानुमितिमत्त्वम् । अथ वा पक्षविषयकानुमितिनिष्ठं यदवच्छेदकत्वं तदूघटितामिमतावच्छेदकताकप्रतियोगितानिरूपकीभूताभाववत्त्वम् । एवंविधलघुनिवेशः किं गदाधरेण न दृष्टः ! दृष्टश्चेद् बहुप्रयत्नेन कामिनीजिज्ञासानुसन्धानं न व्यजनिष्ट । भवतु वा कामिनीजिज्ञासानुसन्धानम्, तथा हि घटो जायतामनुमितिर्जायतामित्याकारकेच्छां यथा नीलघटसिद्धिरर्थात् नीलघटोत्पादः पर्वतादिविशेष्ये बह्न्यादिप्रकारेणानुमित्यात्मकज्ञानविशेषोऽपि निवर्त्तयति, तथा कामिनीज्ञानं जायतामित्याकारिका

सामान्यतः कामिनीजिज्ञासामपि गृहस्थितत्वेन पर्व्वतस्थितत्वेन पृथिवीस्थितत्वेन तरुगतत्वादिना वा विशेषधर्म्मेण कामिनीज्ञानमिति सर्व्वेषामनुभवः । यादृशज्ञानन्तु कामिनीजिज्ञासानिवर्त्तकं भवेत्, तादृशज्ञानं न कामिनीजिज्ञासाप्रतिबध्यमित्यपि सर्व्वसिद्धान्तः । एवञ्च दर्शितदिशा पर्व्वतविषयतायाः कामिनीजिज्ञासाप्रतिबन्धकज्ञानीयतया तदनिवर्त्त्येऽपि तत्र पक्षविषयतायाः सत्त्वेन पक्षविषयताव्यापकत्वं कामिनीजिज्ञासाप्रतिबध्यत्वे कथं तिष्ठेत् ?

अथ कामिनीप्रत्यक्षं जायतामित्याकारककामिनीजिज्ञासायाः प्रतिबध्यत्वस्य निखिलानुमितिषु वर्त्तमानत्वेन प्रत्यक्षावृत्तिपक्षविषयताव्यापकत्वं कामिनीप्रत्यक्षात्मकज्ञानेच्छाप्रतिबध्यत्वेनाप्रसिद्धमिति चेत् कामिनीपक्षकानुमितिस्थलेऽपि तादृशप्रतिबध्यत्वसम्भवेन गदाधरेण तन्मात्रस्थलाप्रसिद्धिः कथं प्रदर्शितेति विज्ञातुं न प्रभवामः ।

न च कामिनीदिदृक्षानिवर्त्त्या तद्दर्शनवत् तदनुमितिरपीति व्यवस्था समीचीना भवति चेद् भवतु, तावता प्राक्प्रदर्शितपर्व्वतादिरूपपक्षघटितकामिनीमवगाहमानानुमित्यात्मकज्ञानेन किमपराद्धम् ? एवञ्च पर्व्वतादिविषयत्वस्यापि व्यापकतायाः कामिनीजिज्ञासाप्रतिबध्यतायां प्रसिद्धत्वेन कामिनीपक्षकस्थल एवाप्रसिद्धिप्रदर्शनमुन्मत्तप्रलापवत् किं न प्रकाशते । एतेन साध्यवत्तानिश्चयप्रतिबध्यत्वादिरूपानुगतधर्म्मेण विविधसंशयानां प्रकृतपक्षसाध्यकानुमितिनिरूपितैकं कारणत्वमिति मणिकारदीधितिकारसम्मतम्; गदाधरेण तद् दूषितम् ।


गदाधरप्रणीतसन्दर्भभावार्थस्तु विविधसंशयानां साध्यवत्तानिश्चयनिवर्त्यसंशयत्वेन कारणत्वं तत्तदभावकार्य्यत्वरूपप्रतिबध्यत्वस्य कार्य्यतावच्छेदकाननुगमेन अननुगततया विविधसंशयानामनुगमासम्भवात् । अतस्तादृशतादृशसंशयोत्तरानुमितित्वावच्छिन्नं प्रति तादृशतादृशसंशयत्वानां प्रत्येकरूपेणैव हेतुत्वम्, अतोऽगत्या एतादृशनानाकार्य्यकारणभावः स्वीकार्य्य इति गदाधरव्यवस्था निरस्ता ।–जन्यत्वादेरखण्डोपाधितायां व्यवस्थापितत्वात् । जन्यत्वादेरननुगतत्वे मणिकारप्रभृतिसकलग्रन्थकाराणां हेत्वाभासतद्विभाजकलक्षणानां न्यायावयवप्रतिज्ञादिलक्षणानाञ्च प्रणयनमुन्मत्तप्रलपितं स्यात् । जन्यत्वानामननुगतत्वं चेत् यत्किञ्चिच्छाब्दबोधनिरूपितशब्दज्ञाननिष्ठा या या जनकतेत्यादिन्यायलक्षणं गदाधरः स्वयमेव कथं प्रणीतवान् ?

अपरमपि रहस्यं पश्यत–मथुरानाथजगदीशमते संशयान्तर्गतस्वत्वगन्धोऽपि नास्ति, गदाधरस्तु स्वाभिमतसंशयत्वघटकतया स्वत्वं निवेश्य मूलकारदीधितिकारप्रभृतिप्रदर्शितानुगतरूपेण पक्षताकारणत्वं दूषितवान् । इति किं "ममैव पितुर्गोपालशतके" इतिप्रवादं नानुधावति ?

अपि च विविधसंशयनिरूपितस्वाव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकताकानुमितिनिष्ठकार्य्यत्वं व्यवस्थाप्य स्वत्वघटितत्वेन संशयत्वमननुगतमिति प्रदर्शितम् । एवं चेद् गदाधरेण स्वप्रकाशितव्यवस्थायां स्वाव्यवहितोत्तरत्वशरीरे किं स्वत्वप्रवेशो नास्ति ? अतः शङ्कासमाधानयोस्तुल्यत्वमेव ।

इति श्रीमन्महामहोपाध्यायश्रीराखालदासन्यायरत्नकृत-
गदाधरन्यूनतावादः समाप्तः ।

अथ दीधितिकृन्न्यूनतावादः ।



भवान् भवन्नाम भवत्पदं वा
पयःकणो वाऽस्य च विश्वबन्धो ।
ब्रह्मेति विज्ञातुमहं विमूढः
प्रत्येकतः सर्व्वशुभानि यस्मात् ॥

व्यधिकरणधर्म्मावच्छिन्नाभावग्रन्थीयजगदीशकृत-प्रमाघटितलक्षणविचारसमीचीनसङ्गमनं सर्व्व एवावगच्छन्तीति न सम्भावयामि, अतस्तत्सङ्गमनप्रकारः प्रकाश्यते, संस्मरतैव "दोषा वाच्या गुरोरपी" त्युपदेशं, दीधितिकृन्न्यूनता च ।

अपि सङ्क्षिप्तवादोऽयं पाठ्यो विद्यार्थिभिर्म्मुदा ।
यतो विचारचातुर्य्यं लभ्यते स्वल्पकालतः ॥
विचारोऽयं नवीनोऽपि समालोच्योविचक्षणैः ।
पुरा परकृतग्रन्थः कदाप्यासीन्नवो न किम् ॥

व्यधिकरणधर्म्मावच्छिन्नाभावोत्थितिमात्रप्रयोजनकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्न-प्रतियोगिताकाभावार्थकसाध्याभावप्रमापदघटितं लक्षणवाक्यं केनचित् प्रणीतम् । अथ व्यधिकरणधर्म्मावच्छिन्नाभावोत्थितेरेव साध्याभावनिवेशप्रयोजनत्वे सामान्यतोऽभावप्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगि-

त्वाभाव एवास्तु परेषां कथं दर्शितार्थकसाध्याभावोक्तिः ? सर्व्वत्र व्यभिचारिणि वाच्यत्वत्वेन घटाद्यभावः साध्याभावश्च एतदुभयत्वावच्छिन्नप्रकारकहेतुमद्विशेष्यकप्रमामादाय अतिव्याप्तिर्व्वारणीया । व्यतिरेकिसाध्यकसद्धेतौ च हेतुमपि तादृशोभयत्वावच्छिन्नप्रकारकप्रमाया अप्रसिद्धया नाऽव्याप्तिरपि । न च काञ्चनमयवह्निमान् इत्याद्यनुमापकपरामर्शस्य प्रमात्वापत्तिः, इतरबाधाद्यसहकृतपरामर्शस्य प्रमारूपस्य भ्रमानुमित्यजनकतायाः सर्व्वसम्मतत्वेनेष्टापत्तेरयोगात् इति वाच्यं, तादृशसाध्यकस्थले वह्नित्वेन काञ्चनमयो नास्तीतिव्यधिकरणधर्म्मावच्छिन्नाभावप्रमामादाय दर्शितापत्तिवारणसम्भवात् यतः काञ्चनमयोवह्निर्नास्तीत्याद्याकारकभ्रमवत् वह्नित्वेन काञ्चनमयोनास्तीति प्रमापि काञ्चनमयवह्निमानिति ज्ञानं प्रतिबध्नाति । सोन्दोऽमते प्रतियोग्यंशे प्रकारीभूतधर्म्मविशिष्टप्रतियोगितावच्छेदकधर्म्मविशिष्टप्रतियोगितावच्छेदकधर्म्मविशिष्टप्रकारकज्ञानं प्रति व्यधिकरणधर्म्मावच्छिन्नाभावज्ञानस्य प्रतिबन्धकत्वव्यवस्थितेरिति चेन्न स्वरूपसम्बन्धावच्छिन्नावच्छेदकताकविधेयताकं गगनवत्त्वानित्याकारकमनुमानमादाय दर्शितदोषस्यावारणात्, यतोगगनेन घटाद्यभावरूपस्य कस्यापि व्यधिकरणधर्म्मावच्छिन्नाभावस्य प्रमा गगनवत्त्वानित्याकारकज्ञानं न प्रतिबध्नाति, परन्तु गगनवद्घटवान् इति ज्ञानं प्रत्येव । एवं च साध्यवद्भेदितव्यापकत्वनिर्व्वचनं युक्तमेव यथासन्निवेशे वैयर्थ्याभावश्च ।

न च तथापि व्यापकताशरीरे साध्यवत्पर्य्यन्तनिवेशप्रयासो विफल एव, साध्यतावच्छेदकवन्निष्ठाभाव-

प्रतियोगितानवच्छेदकत्वेनैव सामञ्जस्यादिति वाच्यं सम्बन्धांशे भ्रमत्वाङ्गीकृन्मते गुणीयसंयोगसम्बन्धेन वह्नि-साध्यकधूमहेतौ तद्दोषतादवस्थ्यापत्तेः।

अथ यदि दर्शितपरामर्शाद् भ्रमानुमितिवारणार्थं साध्यवद्घटितार्थकत्वेन साध्याभावपदमवधारितं तदा साध्याभावपदस्य कथं व्यर्थतेति चेन्न साध्यव्यापकता-वच्छेदकरूपावच्छिन्नप्रतियोगित्वादौ व्यापकतावच्छेदक-सम्बन्धावच्छिन्नत्वादिरूपविशेषणांश एव वैयर्थ्यस्य दीधि-तिकृदभिप्रेतत्वात् तावतापि व्यधिकरणधर्म्मावच्छि-न्नाभावानुत्थतिरूपोद्देश्यसिद्धेरक्षतत्वादिति साम्प्रदा-यिकाः।

वयन्तु ब्रूमः—साध्याभावप्रमायामित्यंशस्य यथा-श्रुतार्थकत्वरक्षाप्रयत्न एव युक्तः। तथाहि साध्याभाव-पदमवृत्तिगगनादिना साध्यतावच्छेदकावच्छिन्नवत्प्रति-योगिकाभाव एव सकलहेतुसाध्यकस्थले प्रमाघटितलक्ष-णकर्त्तुरभिप्रायविषयः। साध्यते यत्र इत्यर्थपरतया दीधितिकृद्व्याख्यात—"साध्यनिर्देशः प्रतिज्ञे"तिसूत्र-स्थसाध्यपदवत् प्रमाघटितलक्षणवाक्यस्थसाध्याभावेत्य शंस्थितसाध्यपदस्यापि तदर्थकत्वसम्भवात्। न च साध्य प्रतियोगिकांशवैयर्थ्यमिति वाच्यं गगनवत्त्वान् गुणीयसं-योगेन वह्निमान् इत्याद्यनुमितिस्थले दर्शितापत्तिवारणार्थं साध्यपदस्य साध्यतावच्छेदकवद्विशिष्टपरत्वावश्यक-त्वानुरोधेन तदंशवैयर्थ्याभावात्। न च साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकताघटिततल्लक्षणोपवर्णनं ग्रन्थकारस्य न्यूनतायां पर्य्यवस्येत् इति वाच्यं, प्रमाघटि-

तलक्षणवाक्यस्थसाध्याभावस्य तादृशव्याख्यायाः कुत्राप्यप्रदर्शितत्वेन ग्रन्थकारस्य न्यूनत्वायोगात् ।

इदमत्रावधेयं यत्समानाधिकरणसाध्याभावप्रमासामान्ये साध्यवत्ताज्ञानविरोधित्वं नास्तीतिलक्षणवाक्यस्य साध्यसामान्याभाववद्धूदकालीनपर्व्वतो वाच्यत्वत्वेन प्रमेयत्वाभाववानित्याद्याकारकज्ञानमादाय व्यतिरेकिण्यव्याप्तिवारणाय साध्याभावप्रकारकप्रमीयहेतुमन्निष्ठविशेष्यतासामान्ये तादृशप्रतिबन्धकतावच्छेदकत्वाभाव इत्येवार्थो विवक्षणीयः । साध्याभावनिवेशस्य व्यर्थतां प्रदर्श्य एतल्लक्षणं दूषितम् ।

अथ साध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभावत्वकत्वमत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वरूपम् । अत्र लक्षणेऽपि दीधितिकृता साध्याभावपदव्यर्थत्वं प्रदर्शितम् । जगदीशेन च तस्य सार्थक्यं कर्त्तुं स्वप्रतियोगिसाध्यसामानाधिकरण्यानतिरिक्तवृत्तित्वतात्पर्य्यमुपवर्ण्य अखण्डाभावघटकतया साध्ये स्वप्रतियोगित्वनिवेशस्यावैयर्थ्यं व्यवस्थाप्य साध्याभावनिवेशस्यावश्यकत्वमाशङ्कितं, तेन पुनः स्वप्रतियोगिसाध्यसाध्यसामानाधिकरण्याभाववद्वृत्तित्वसामान्याभावः शुद्धसाध्यघटितस्तादृशाभावश्चैक एव न तु पृथगिति नाखण्डाभावघटकतया स्वप्रतियोगित्वनिवेशस्य सार्थकतेति समाहितम् । एवञ्चाखण्डाभावघटकतया सार्थक्यस्य जगदीशेन स्वहस््िततया प्रमाघटितलक्षणे कथं साध्याभावपदवैयर्थ्यं, सामान्यतो हेतुसमानाधिकरणप्रमाविशेष्यतात्वव्यापकतातः साध्याभावप्रमाविशेष्यतात्वव्यापकतारूपसामान्याभावेऽत्यन्तभेदात् । न च निखिलप्र-

विशेष्यतायां समूहालम्बनसाध्याभावप्रमीयतया दर्शित-व्यापकतयोरैक्येन न साध्याभावपदसार्थक्यमिति वाच्यं तावता वरं तत्सार्थक्याय दर्शितप्रतिबन्धकतावच्छेदक-त्वाभावे प्रमीयसाध्याभावप्रकारतानिरूपितहेतुमन्निष्ठ-विशेष्यतात्वव्यापकत्वस्य तादृशविशेष्यतानिरूपिततादृ-शप्रकारतात्वव्यापकत्वस्य वा यथा कामं निवेशनीय-त्वात् । इति चेदत्र केचित्, गुरुधर्म्मस्य प्रतियोगितानव-च्छेदकतया केवलान्वयिरूपसद्धेतुस्थले हेतुमन्निष्ठत्वाघ-टितशुद्धतादृशविशेष्यतात्वघटितधर्म्मस्यैव लघुतया तद-वच्छिन्नाभावस्यैव प्रामाणिकत्वात् । अतस्तादृशविशेष्य-तानिष्ठाभावप्रतियोगितावच्छेदकव्यक्तिभेदकूटरूपव्या-पकतावच्छेदकत्वं निवेश्यम् । एवञ्चाखण्डाभावघटकतया साध्याभावप्रकारतानिवेशस्य सार्थक्यं कथं सम्पाद-नीयम् ।

न च गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वे गुरुरूपेण साध्यतास्थलेऽव्याप्तिः साध्यवत्ताबुद्धिप्रतिबन्धकत्वाप्र-सिद्धेः, कथञ्चित्प्रसिद्धावपि तादृरूपेण साध्यतायां व्यभिचारिण्यतिव्याप्तिः साध्यसामान्याभावप्रमाया-अप्रसिद्धत्वादिति वाच्यं साध्यवत्तास्थले साध्यव्यापक-तावच्छेदकावच्छिन्नवत्तायाः साध्यप्रकारकप्रमाविशेष्य-तायाः वा निवेशनीयत्वात् । एतेन वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वेऽपि निरुक्तदोषवैकल्पिकत्व शङ्का समाहितेत्याहुः ।

तन्न सामान्याभावमनिवेश्य निरुक्ताभावकूटरूप-व्यापकतावच्छेदकत्वनिवेशेऽपि साध्याभावप्रकारतानि-रूपितविशेष्यतानिवेशसत्त्वे निरुक्तावच्छेदकभेदकूटस्य

साध्याभावप्रकारतानिरूपितत्वमनिवेश्य तादृशविशेष्यतावच्छेदकभेदकूटापेक्षयाऽतिलाघवेन तन्निवेशस्यावश्यकत्वम् । ईदृशलाघवगौरवं जगदीशेन सिद्धान्तलक्षणविचारप्रकरणे प्रदर्शितम्, अत्र च केषाञ्चित् यत् कूटत्वानुगमविचारवाचालत्वं तदुपेक्षितम्, तादृशानुगमस्य जगदीशानभिप्रेतत्वात् । गुरुधर्म्मघटितधर्म्मावच्छिन्नानुयोगिताकत्वपर्य्याप्तेर्गदाधरस्याप्यसम्मतत्वात् । यतो गदाधरेण प्रतिज्ञालक्षणे साध्यवत्तावुद्धिजनकतावच्छेदकयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकत्वं यावत्त्वेऽनिवेश्य अतिगुर्व्वपि तादृशवर्णत्वमामनैयत्यं निवेशितम् ।

यत्तुगुरुधर्म्मेषु दर्शितपर्य्याप्त्यनुयोगितावच्छेदकत्वं गदाधरस्याननुमतमिति तत्प्रणीतशक्तिवादोयसर्व्वपदशक्तिविचारदर्शनेनाप्यवधार्य्यताम् येन ह्यतिलघुशरीरोद्देश्यतावच्छेदकावच्छिन्नानुयोगिताकत्वं पर्य्याप्तावनिवेश्यातिगुर्व्वप्युद्देश्यतावच्छेदकव्यापकत्वं तस्यां सर्व्वपदप्रवृत्तिनिमित्ताघटकीभूतायां निवेशितमित्याह तच्चिन्त्यम्। लक्षणवाक्यस्यसाध्याभावेत्यंशघटकसाध्यपदस्य व्यर्थत्वाच्च ।

इदमत्रावधेयं गुरुधर्म्माणां प्रतियोगितावच्छेदकत्वास्वीकर्त्तृमतेऽपि विशेष्यतात्वघटितास्वण्डाभावरूपं व्यापकतावच्छेदकत्वं सम्भवति । तथाहि यत्र स्थले तादृशविशेष्यतायां हेतुमन्निष्ठत्वं ज्ञानानन्तरनिरूपितविशेष्यतायाअव्यावर्त्तकं भवेत् तादृशसद्धेतुस्थले हेतुमन्निष्ठत्वं लक्षणघटकव्यापकताशरीरे न देयं, यादृशहेतुसाध्यकस्थले तच्च व्यावर्त्तकं भवेत् तत्रैव तद्देयम् । न हि तावता

लक्षणकर्त्तुर्न्यूनता तथा सति प्रतियोगिवैयधिकरण्यघटितलक्षणकर्त्तुर्मणिकृतोऽपि न्यूनता स्यात् व्याप्यवृत्तिसाध्यकस्थले तल्लक्षणे प्रतियोगिवैयधिकरण्याप्रवेशस्य दीधितिकृता व्यवस्थापनात् । प्रमालक्षणद्वयार्थे तु एकं स्वावच्छिन्नवन्निष्ठविशेष्यतानिरूपितप्रमीयसाध्याभावत्वावच्छिन्नप्रकारत्वव्यापकदर्शितप्रतिबन्धकत्वाभावकालीनहेतुतावच्छेदकावच्छिन्ननिरूपकतावत्त्वं तादृशहेतुतावच्छेदकवत्त्वं वा अपरञ्च हेतुमन्निष्ठत्वाविशेषितव्यापकताघटितहेतुतावच्छेदकावच्छिन्ननिरूपकतावत्त्वमिति प्रभेदः अथवा एकोक्तयैव निरुक्तलक्षणद्वयमपि निर्व्वक्तुं शक्यते, रीतिस्तु दर्शितव्यापकतारूपाखण्डाभावघटकविशेष्यतानिष्ठावच्छेदकतायां न्यूनाधिकं वारयित्वा हेतुमन्निष्ठत्वसहितविशेष्यतात्वावच्छिन्नत्वं न निवेश्यते, परन्तु हेतुमन्निष्ठत्वनिष्ठावच्छेदकताभिन्ना सती या विशेष्यतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकता तदनिरूपकत्वे सति विशेष्यतात्वनिष्ठावच्छेदकत्वनिरूपकत्वमेव । तत्तद्व्यक्तीनां स्वरूपतो भानाङ्गीकृन्मते तत्तद्विशेष्यताव्यक्तिनिरूपितप्रमीयसाध्याभावत्वावच्छिन्नप्रकारत्वघटितव्यापकतामादाय व्यभिचारिमात्रेऽतिव्याप्तिवारणार्थं विशेष्यतानिष्ठावच्छेदकतायां विशेष्यतात्वावच्छिन्नत्वं निवेशितम् । एवञ्च प्रमाघटितलक्षणस्यैवंरीत्या परिष्कारपटीयान् को हि दीधितिकारप्रदर्शितसाध्याभावपदवैयर्थ्यरूपदोषे श्रद्दधाति ।

परे तु स्वप्रतियोगिसामानाधिकरण्यानतिरिक्तवृत्तित्वमाशङ्क्य तस्याखण्डत्वं जगदीशेन यन्निराकृतं तत्तु प्राचीनप्रवादमवलम्ब्यैव । स्वमते तु स्वसमानाधिकरण-

धर्म्मान्तरघटितातिव्याप्त्याद्यवारकधर्म्मावच्छिन्नघटिता खण्डाभावोऽपि लक्षणघटको न भवेत् । नित्यः शब्दो विशेषगुणान्तरासमानाकरणैकमात्रवृत्तिगुणत्वादितिमिश्रोक्तहेतौ अन्तरपदार्थस्य असिद्धिवारकतया तत्सार्थक्यमुपपादितम् । अखण्डाभावघटकतया सार्थक्यस्य जगदीशसम्मतत्वे विशेषगुणसामानाधिकरण्यसामान्याभावात् शब्दभिन्नतादृशसामानाधिकरण्यसामान्याभावस्यात्यन्तभेदेन तदुपपत्तिप्रयासवैफल्यं स्यात् । व्यभिचाराद्यवारकत्वेऽप्यखण्डाभावघटकतया सार्थक्ये प्रमाघटितलक्षण इव हेतुसमानाधिकरणाः साध्याभावाः सर्व्वे साध्यसमानाधिकरणा इतिप्रगल्भोक्तप्रथमलक्षणेऽपि दीधितिकृता साध्याभाववैयर्थ्योक्तिरुन्मत्तप्रलापः स्यात् । यतः सिषाधयिषायाः पक्षतात्वमते गङ्गेशे पाध्यायग्रन्थस्थितसिषाधयिषितसाध्यधर्म्मेत्यंशप्रतिपाद्यसिषाधयिषाया यथा सिषाधयिषाविरहकूटत्वावच्छिन्नाभावत्वाश्रयपर्य्यवसानं मथुरानाथेन कृतं तथा प्रगल्भलक्षणघटकहेतुसमानाधिकरणसाध्याभावानामपि हेतुसमानाधिकरणसाध्याभावत्वावच्छिन्नप्रतियोगिताकः साध्याभावांशरहितशुद्धहेतुसामानाधिकरण्यावच्छिन्नप्रतियोगिताकाभावादत्यन्तभिन्नो यो भेदस्तत्प्रतियोगितावच्छेदकधर्म्मवत्त्वेन साध्याभावनिष्ठहेतुसामानाधिकरण्यस्याभावरूपाखण्डाभावाभाववत्तादिना वा तात्पर्य्योपवर्णनं सम्भवति तादृशभेदप्रतियोगितावच्छेदकावच्छिन्नेषु साध्यसामानाधिकरण्यस्यान्वयेन हेतुसमानाधिकरणसाध्याभावत्वावच्छिन्नेष्वनन्वयेन च यथासन्निवेशे वैयर्थ्याभावोऽपि । एतावता दीधितिकारस्या-

प्यखण्डाभावघटकतया सार्थक्यं नानुमतमिति सर्व्वैरेवानुमीयताम् ।

एवञ्च साध्याभावपदवैयर्थ्यदानं गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वेऽपि दर्शितव्यापकत्वस्य अखण्डत्वेऽपि च सुष्ठु सङ्गतम् । दीधितिकारेण युक्तया गुरुधर्म्माणां प्रतियोगितावच्छेदकत्वव्यवस्थापिततया तादृशनिर्दोषपदार्थमाश्रित्य साध्याभाववैयर्थ्यं दत्तम् । एवं च साध्यवत्ताज्ञानविरोधित्वं नास्तीत्यत्र साध्यपदं न साध्यव्यापकतावच्छेदकावच्छिन्नार्थकं किन्तु यथाश्रुतार्थकमेव, वृत्त्यनियामकसम्बन्धेन साध्यतास्थले तु व्यभिचारिण्यतिव्याप्तिः साध्यवद्भेदमादायैव वारणीया । अव्याप्यवृत्तिसाध्यकव्यभिचारिणि साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभावः साध्यसामान्याभावश्च एतदुभयत्वावच्छिन्नप्रकारकप्रमामादायैवातिप्रसङ्गो वार्य्यताम्, गुरुधर्म्माणां प्रतियोगितानवच्छेदकत्वपक्षमवलम्ब्य साध्यपदस्य साध्यव्यापकतावच्छेदकावच्छिन्नतात्पर्य्योपवर्णनं न युक्तं तथा सति साध्यव्यापकतावच्छेदकीभूतधर्म्मावच्छिन्नाभावत्वपर्य्यवसितेन साध्याभावत्वेनावच्छिन्नप्रमीयप्रकारतायां व्यासज्यवृत्तिधर्म्मानवच्छिन्नत्वेन स्वरूपातिरिक्तसम्बन्धावच्छिन्नावच्छेदकत्वानिरूपकत्वेन वा निवेशनीयायां साध्याभावपदसार्थक्याय साध्यव्यापकतावच्छेदकसम्बन्धेन दर्शितार्थकसाध्यवत्ताबुद्धिमनिवेश्य यथाकथञ्चित्सम्बन्धेन तद्बुद्धिं निवेश्य तादृशबुद्धिं प्रति प्रतिबन्धकतावच्छेदकत्वाभाव एव निविश्यते, एवं निवेशे समीचीने साध्याभावपदवैयर्थ्यदानं कथं सम्भवेत । गुरुधर्म्माणां प्रतियोगितावच्छेदकत्वे तु यथाश्रुतसाध्यवत्ताबुद्धिप्रतिबन्धकत्वनिवेशौचित्ये चाव्याप्यवृत्ति-

साध्यकव्यभिचारिण्यतिव्याप्तिवारणं प्रोक्तोभयत्वावच्छिन्नप्रकारकप्रमोपादानं विना गीर्व्वाणगुरोरप्यशक्यम । एवं च समवायेन साध्याभावो व्यधिकरणधर्म्मावच्छिन्नाभावश्च एतदुभयत्वावच्छिन्नप्रमीयप्रकारतामादाय सद्धेतावव्याप्तिवारणार्थं साध्यतावच्छेदकसम्बन्धेन साध्यवत्तावुद्धिलक्षणघटकतयावश्यं निवेश्या लक्षणवाक्यस्य ईदृक् तात्पर्य्यमवधार्य्यैव दीधितिकृता साध्याभावपदवैयर्थ्यं दत्तम । अथाव्याप्यवृत्तिसाध्यके वृत्त्यनियामकसम्बन्धावच्छिन्नसाध्यके च व्यभिचारिणि सर्व्वत्र साध्यवद्भेदत्वमात्रावच्छिन्नप्रकारकप्रमामादायातिव्याप्तिर्व्वारणीया, तादात्म्यसम्बन्धेनाऽव्याप्यवृत्तिमतामपि व्याप्यवृत्तितया तत्सम्बन्धेन सुतरां साध्यवतामपि प्रतियोगिवैयधिकरण्यघटितव्यापकतया च साध्यावच्छिन्नप्रतियोगितांकभेदत्वावच्छिन्नप्रकारताकप्रमाया अपि धर्त्तुं शक्यत्वात् । तद्वत्तावुद्धिं प्रति तत्प्रकारकनिश्चयस्येव तद्भेदप्रकारकनिश्चयस्य प्रतिबन्धकतायामविवादेन दर्शितसाध्यवद्भेदप्रकारतायां तत्तत्साध्यवत्तावुद्धिप्रतिबन्धकतावच्छेदकत्वसत्त्वाच्च । एवञ्च स्वरूपातिरिक्तसम्बन्धावच्छिन्नावच्छेदकत्वानिरूपकत्वमेव प्रमीयप्रकारतायां निवेशनीयम् । तावतैव समवायादिसम्बन्धावच्छिन्नवह्न्यभावप्रमामादाय न दोषप्रसक्तिः, भवति च साध्यव्यापकतावच्छेदकधर्म्मावच्छिन्नातादृशव्यापकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितांकत्वनिवेशावश्यकत्वम् । ईदृशप्रतियोगितायां अनिवेशे समवायादिना वह्न्यभावप्रमाया वारणासम्भवात् । साध्यवत्तावुद्धिस्तु यथाकथञ्चित्सम्बन्धावच्छिन्नप्रकारिकैवास्तु । एवञ्च साध्याभावपदवैयर्थ्यं दीधितिकृता कथं प्रदर्शितं कथं वा जगदीशेन

साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यप्रकारकत्वं निवेश्यते यन्निवेशबलेन व्यधिकरणधर्म्मावच्छिन्नाभावोत्थापकसाध्याभावघटितपरकीयनिर्दोषलक्षणे सदोषता प्रसज्येत । इति चेन्न यतो विशिष्टसत्तायाः सत्तानतिरिक्ततया गुणान्यत्वविशिष्टसत्ताभाववान् सत्त्वादित्यादावतिव्याप्तिः साध्यस्य साध्यवतो वा साध्यव्यापकत्वाभावात् । दीधितिकृन्मते त्वव्याप्यवृत्तिमद्भेदस्याव्याप्यवृत्तित्वेन तत्तत्साध्यकव्यभिचारिण्यतिव्याप्तिश्च । वस्तुतस्तु व्यासज्यवृत्तिसाध्यकव्यभिचारिमात्रेऽतिव्याप्तिः, तेषां सर्व्वेषामेव पर्य्याप्तिसम्बन्धेनाव्याप्यवृत्तित्वात्, तद्विशिष्टानां तादात्म्यसम्बन्धेनासम्बद्धतया तत्सम्बन्धेन साध्याव्यापकत्वाच्च । अवच्छेदकत्वनिरुक्तौ वस्तुत इति ग्रन्थेन स्वावच्छिन्नप्रतियोगित्वसम्बन्धेन प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वनिवेशं प्रदर्शितवतो जगदीशस्यापि व्यासज्यवृत्तिधर्म्माणामव्याप्यवृत्तित्वमनुमतमिति प्रतीयते । एतेन सुप्रसिद्धनिबन्धकृन्मथुरानाथप्रभृतीनां किमधिकं गङ्गेशोपाध्यायस्य च मतेऽपि अव्याप्यवृत्तिमद्भेदस्य व्याप्यवृत्तित्वम् । एवञ्च तन्मतावलम्बनेन प्रमाघटितलक्षणपरिष्कारे कोऽनुयोगः । साध्यव्यापकत्वं च साध्यवद्वृत्तितावच्छेदकानुयोगितानिरूपितप्रतियोगितावघटितम्, अतो दर्शितविशिष्टाभावसाध्यकव्यभिचारिणि नातिव्याप्तिरपीति शङ्का समाहिता ।

अथैवमपि व्यासज्यवृत्तिसाध्यके कपिसंयोगादिसाध्यके च सद्धेतावव्याप्तिः, अयं द्वित्ववान् मूलावच्छिन्नवृक्षः कपिसंयोगवान् इत्याकारकसाध्यवत्ताज्ञानप्रतिबन्धकतायां अयं द्वित्वाद्यभावान् मूलावच्छिन्नवृक्षः

कपिसंयोगाद्यभाववानितिज्ञाने सत्त्वात्, हेत्वधिकरण-विशेष्यकप्रमात्वाच्च । ईदृशी प्रमा च वाच्यत्वत्वेनघटाद्यभावघटितोभयत्वावच्छिन्नप्रकारिकैव धर्त्तव्या । अतो न दर्शितार्थकसाध्याभावप्रकारकत्वहानिः । न च साध्याभावत्वावच्छिप्रकारतायां निरवच्छिन्नवृत्तिकत्ववैशिष्ट्यावच्छिन्नत्वमपि निवेश्यमिति वाच्यं, तथा निवेशेऽपि मूलावच्छिन्ना वृत्तौ निरवच्छिन्नवृत्तिकत्वविशिष्टव्यधिकरण-धर्म्मावच्छिन्नाभावकपिसंयोगाभावोभयवानित्याकारकप्रमामादायाव्याप्तेरवारणादिति चेन्न, व्यासज्यवृत्तिधर्म्मावच्छिन्नप्रकारत्वानिरूपिता सती या साध्याभावत्वावच्छिन्नप्रकारत्वनिरूपितहेतुमन्निष्ठप्रमीयविशेष्यता तन्निरूपितनिरवच्छिन्नवृत्तिकत्वावच्छिन्नप्रकारतायां साध्यवत्ताबुद्धिप्रतिबन्धकतावच्छेदकत्वाभावे प्रमाघटितलक्षणवाक्यस्य तात्पर्य्योपगमात् । अव्याप्यवृत्तिसाध्यविशेषे व्यभिचारिणि साध्यव्यापकतावच्छेदक-रूपावच्छिन्नाभाव-निरवच्छिन्नवृत्तिकत्व-विशिष्टसाध्यसामान्याभावयोरेकत्र द्वयं रीत्या व्यभिचारनिरूपकहेत्वधिकरणे प्रमामादायैवातिव्याप्तिर्व्वारणीया । एवञ्च व्यधिकरणधर्म्मविशेषावच्छिन्नाभावप्रकारिकां व्यधिकरणसम्बन्धावच्छिन्नसाध्यसामान्याभावप्रकारकप्रमामादायासम्भवबारणार्थं साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारकसाध्यवत्त्वबुद्धिर्जगदीशेन निवेशिता । अत्र तल्लक्षणवाक्यस्थसाध्याभावपदलभ्यस्य प्रकारतायां साध्याभावत्वावच्छिन्नत्वविशेषणस्य व्यर्थताप्रदर्शनं दीधितिकृतः सुष्ठु सङ्गतम् ।

इदन्तु चिन्त्यं गुरुधर्म्माणां प्रतियोगितावच्छेदकत्वेऽपि साध्यपदस्य साध्यव्यापकतावच्छेकावच्छिन्नपरत्वं यत् प्राग्दर्शितमत्रापि तदर्थकत्वमेवास्थीयते। अतः प्राग्दर्शित-युक्त्या साध्याभावस्य सार्थक्यं समीचीनमेव प्रतिभाति। इति साध्याभावपदस्य दीधितिकृता यद्वैयर्थ्यं दत्तं तत् किं न जिगीषामात्रफलम्। यत्तु साध्यवत्ताबुद्धिपदघटक-साध्यपदेन शक्त्या यदर्थो लभ्यते तदर्थघटितलक्षणएव दीधितिकृता वैयर्थ्यं दत्तमिति दीधितिकारं प्रति कोऽनु योगः? साध्यपदस्य दर्शितलाक्षणिकत्वं स्वीकृत्य भवत्-कृतलक्षणं निर्दोषं भवति चेद्भवतु तावता दीधितिकारस्य व्रतम्। ईदृग्ग्रन्थभाववर्णनमतीव हास्यास्पदं सिद्धान्त-लक्षणे हेतुबोधकस्य यत्पदस्य हेत्वाभासदोषबोधकस्य तस्य मणिकारोक्तस्य हेतुतावच्छेदकदोषतावच्छेदकपर-तया व्याख्यानेन दीधितिकृता मणिकारलक्षणं निर्दोषं किं न कृतम्। किमधिकं केवलान्वयिग्रन्थे व्याप्तिग्राहक-सहचारत्वव्यापकव्याप्तिघटकसहचारकत्वमितिदीधिति-कारोक्तलक्षणस्य निर्दोषतारक्षार्थं जगदीशेन व्याप्तिघटक-सहचारपदस्य सर्व्वस्वेनापीतिन्यायेन व्यतिरेकसहचारा-वगाहितान्यत्वपरताव्याख्यानेऽपि जगदीशो भयं नाल-भत। वस्तुतः साध्यपदस्य व्यापकत्वावच्छिन्नबोधक-तापि ग्रन्थकारानुमता। विशेषव्याप्तौ रूपादेरसाध्यता-पत्तेरितिदीधितिकारपङ्क्तिस्थासाध्यतापदस्याव्यापक-त्वपरतया जगदीशेन व्याख्यातत्वात्। एवं सति प्रमाघ-टितलक्षणकर्त्तुस्तत्कृतलक्षणवाक्यस्थसाध्यपदद्वयस्य सा-ध्यव्यापकपरतयाभिप्रायोपवर्णनं कर्त्तुं कथं न शक्यते।

न च प्रतिबध्यतावच्छेदकप्रकारतायां सम्बन्धविशेषावच्छिन्नत्वनिवेशासत्त्वेऽपि साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितावच्छेदकतायां अधिकवारकपर्य्याप्तिर्न निवेश्यते तावता केवलान्वयिसाध्यकस्थले वाच्यत्वघटोभयत्वावच्छिन्नाभावादिकमादायाव्याप्तिवारणसम्भवेन व्यधिकरणधर्म्मावच्छिन्नाभावानुत्थितिदोषस्तदवस्थ एव इति वाच्यम्, अयोगोलकीयवह्निभिन्नवह्निमान् धूमादित्यादावव्याप्तेः यतः समवायसम्बन्धावच्छिन्नप्रतियोगिकाभावप्रमायां प्रकृतप्रतिबन्धकत्वं वर्तते । न च पर्य्याप्तिनिवेशेऽप्येष एव दोषस्तादृशभेदेन वह्निर्नास्तीतिसामान्यधर्म्मेण विशेषाभावप्रमाया अपि सोन्दोङ्मते तादृशभेदवद्वह्निमानित्याकारकसाध्यवत्ताज्ञानप्रतिबन्धकत्वादिति वाच्यं सामान्यधर्म्मेण विशेषाभावाद्यनभ्युपगमात् । तदभ्युपगमे तु स्वसमानाधिकरणस्वभिन्ननिष्ठावच्छेदकतानिरूपकप्रतियोगिताभिन्नत्वस्य निरुक्तव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायां निवेश्यत्वात् । सामान्याभावीयप्रतियोगित्वं प्रतियोगितावच्छेदकस्वरूपम्, अपरञ्च प्रतियोगित्वं न तथा । ईदृशमतावलम्बनं विना वाच्यत्वत्वादेरपि साध्यव्यापकतावच्छेदकत्वं निर्व्वक्तुं न शक्यते । वाच्यत्वत्वेन घटाद्यभावस्य च साध्यवति सत्त्वात् ।

इदमत्रालोचनीयं साध्याभावप्रकारकत्वमनिवेश्य प्रमीयहेतुमन्निष्ठविशेष्यतामात्रनिवेशे घटादिभिन्नत्वप्रकारकप्रमाविशेष्यत्ववान् घटादिभेदादित्यादावव्याप्तिस्तादृशसाध्याभावो घटे इत्याद्याकारकाधेयत्वसम्बन्धावच्छिन्न-घटप्रकारकहेत्वाश्रयीभूत-दर्शितसाध्याभावविशे-

ष्यकप्रमायां घटस्तादृशसाध्यवान् इत्याकारकबुद्धेः प्रतिबन्धकत्वात्, ह्रदो वह्निमानित्याकारकबुद्धिं प्रति ह्रदे वह्निर्नास्तीतिप्रमायां प्रतिबन्धकत्ववत्। न च वाच्यत्वत्वेन प्रमेयत्वाभावभिन्नत्वप्रकारकप्रमाविशेष्यत्ववान् तादृशाभावभेदादित्यादिसङ्केतौ साध्याभावस्तादृशव्यधिकरणधर्म्मावच्छिन्नाभावे इत्याकारकनिश्चयस्याधेयत्वसम्बन्धावच्छिन्न-दर्शितव्यधिकरणधर्म्मावच्छिन्नाभावः साध्यवानित्याकारकबुद्धिं प्रति प्रतिबन्धकत्वेन साध्याभावनिवेशेऽप्यव्याप्तिप्रसक्तिः, अतस्तद्वारणार्थं स्वरूपसम्बन्धावच्छिन्नत्वस्याधेयत्वसम्बन्धानवच्छिन्नत्वस्य वा साध्याभावप्रकारतायां निवेशावश्यकत्वम्, एवञ्च साध्याभावमनिवेश्य तादृशसम्बन्धानवच्छिन्नत्वमात्रनिवेशेनैव चरितार्थत्वसम्भवादिति वाच्यं तथापि निरुक्तसाध्याभावस्तद्वृत्तिः साध्यं तन्निष्ठाभावप्रतियोगि वेत्याकारकनिश्चयमादाय तत्र तत्राव्याप्तेरवारणात्। यदि चैतावता वरमभावत्वावच्छिन्नतादृशप्रकारतामात्रनिवेशनमेवास्तु व्यधिकरणधर्म्मावच्छिन्नाभावोत्थितिप्रयोजनकसाध्याभावनिवेशनं व्यर्थमेवेत्युच्यते तथाप्यभावत्वस्य भावाभावसाधारणतया भावत्ववत् तादृशप्रतियोगित्वादिमानित्यादिप्रमाया अवारणात्। एवं ह्रदो वह्निमानितिज्ञानं प्रति वह्निर्न ह्रदवृत्तिर्ह्रदवृत्तित्वसामान्याभाववान् वेत्याकारकनिश्चयस्य प्रतिबन्धकतावत् तत्तद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वं न तत्र तत्रेत्याद्याकारकनिश्चयमादायाव्याप्तिवारणार्थं साध्याभावनिवेशसार्थक्यात्। संशयपक्षतावादिमते दर्शितकोटिकसकलसंशयग्रहार्थं पक्षे साध्यवत्तानिश्चयनिवर्त्यत्वरूपेणानुगमः

प्रदर्शितो दीधितिकारेण, स च न दूषितः। एवञ्च प्रमाघटितव्याप्तिलक्षणप्रणेतुः कोऽपराधः? योह्येकधर्म्मिणि ग्राह्यतदभावप्रकारकज्ञानयोरेव प्रतिबध्यप्रतिबन्धकभाव इति न स्वीकुरुते स्म, परन्तु गङ्गेशोपाध्यायप्रभृतिसम्मतं दर्शितप्रतिबध्यप्रतिबन्धकभावं य एव हि सन्देहः साध्यनिश्चयविरोधी स एवानुमानाङ्गमिति तल्लिखनस्य प्रमेयत्वादौ पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाध इति लिखनस्य च दर्शनेन दर्शितनानाविधज्ञानानामेकत्र ग्राह्यवत्ताज्ञानस्य च परस्परप्रतिबध्यप्रतिबन्धकभावः किं नावधारितो गङ्गेशोपाध्यायमतेऽपि?

मतविशेषमवलम्ब्यैव साध्याभावपदवैयर्थ्यं दीधितिकृता दत्तमिति तु विचित्र एव ग्रन्थसङ्गमनप्रयासः। दृश्यते हि सर्व्वत्र ग्रन्थकाराणां लक्षणविशेषणस्य सार्थक्यायैव बह्वायासः, किमधिकं तत्सार्थक्यं कर्त्तुमङ्कुरविशेषोऽपि कल्पितः। हेत्वाभासे अत्र वदन्ति-कल्पे साध्यनिश्चयविषयाङ्कुरविशेषेऽतिव्याप्तिसम्भावनया तद्वारणार्थमेव लक्षणे विरोधिविषयतानिवेश इति गदाधरेण स्वहस्तितम्। एवं कालस्यानवधित्वात् पुरुषाणामसंख्यत्वादित्यादिसन्दर्भेण दोषवारणार्थमनुमितिग्रन्थे सङ्गतिलक्षणघटककियद्विशेषणस्य सार्थक्यं तेन स्वहस्तितञ्च; जगदीशग्रन्थेऽप्येवमेव रीतिर्दृश्यते। लक्षणविशेषणवैयर्थ्यदानार्थं गङ्गेशोपाध्यायाद्यनुमतपदार्थमुपेक्ष्य मतविशेषमवलम्ब्य च लक्षणस्थसाध्याभावस्य व्यर्थतारक्षाप्रयासः किमुताभूतपूर्व्वत्वमाश्रित्य नाविर्भवति। अथास्तुसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगि-

ताकाभावनिवेशनं, तथापि प्रतियोगितायां व्यापकतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशो व्यर्थः। दीधितिकारस्य च तदंश एव वैयर्थ्यदाने तात्पर्य्यं, तावतैव व्यधिकरणधर्म्मावच्छिन्नाभावानुत्थितिप्रसङ्गरूपदोषस्य निर्व्वाहादिति चेन्न स्वावच्छेदकसम्बन्धावच्छिन्नव्यापकतायाः अवच्छेदकावच्छिन्नत्वेनैव प्रतियोगितायाः निवेशेन यथासन्निवेशे वैयर्थ्याभावात्।

अनुगमप्रकारश्च,—स्वावच्छेदकत्वस्वावच्छेदकसम्बन्धावच्छिन्ननिरुक्तव्यापकतावच्छेदकत्वोभयसम्बन्धावच्छिन्नाधेयत्व-सम्बन्धेन प्रतियोगितावैशिष्ट्यम्। न च सम्बन्धघटकावच्छेदकत्वांशो व्यर्थ इष्टापत्तौ व्यधिकरणधर्म्मावच्छिन्नाभावानुत्थितिप्रसङ्ग इति वाच्यं तदंशानिवेशे प्राग्दर्शितविविधबाधप्रमामादायाव्याप्तिप्रसङ्गात्, तत्र तत्र प्रतियोगितावच्छेदकीभूतस्वरूपसम्बन्धेन प्रमेयत्वत्वादौ व्यापकतावच्छेदकत्वसौलभ्यात्। स्वतादात्म्यस्वावच्छेदकसम्बन्धावच्छिन्नव्यापकतावच्छेदकधर्म्मावच्छिन्नत्वैतदुभयसम्बन्धेन प्रतियोगितावैशिष्ट्यमिति तु नार्थः, सम्बन्धघटकतादात्म्यनिवेशस्य व्यर्थतापत्तेः, इष्टापत्तौ व्यधिकरणधर्म्मावच्छिन्नाभावानुत्थितिप्रसङ्गः, लक्षणघटकप्रतियोगितायास्तादृशसम्बन्धेन न तादात्म्यघटितेन प्रतियोगित्वान्तरवैशिष्ट्यलाभेऽप्यव्याप्त्यप्रसक्तेः। किञ्च अणुभिन्नजलस्य समवायसम्बन्धेन साध्यतायां तादृशजलप्रकारकप्रमाविशेष्यत्वहेतावव्याप्तिः स्यात्, यदि व्यापकतावच्छेदकसम्बन्धावच्छिन्नत्वस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितायां प्रवेशो न

स्यात्, तथाहि तादृशजलं महाकालसमवेतत्वाभाववदितिनिश्चयस्य महाकालः समवायेन तादृशजलवानिति बुद्धिं प्रति विरोधित्वं समवायसम्बन्धावच्छिन्नमहाकालवृत्तितात्वस्य कालिकसम्बन्धेन साध्यव्यापकतायाअवच्छेदकत्वञ्च, अतः प्रतियोगितायामपि व्यापकतावच्छेदकसम्बन्धावच्छिन्नत्वमवश्यं निवेश्यम् । न च कालिकसम्बन्धेन महाकालसमवेतत्वस्य जलादावव्याप्यवृत्तित्वेन न साध्यव्यापकत्वमिति वाच्यं, नवीनमते तेन सम्बन्धेन तस्याव्याप्यवृत्तित्वेऽपि प्राचीनमतसाधारण्याय प्रतियोगितायां सम्बन्धावच्छिन्नत्वनिवेशावश्यकत्वात् ।

वस्तुतस्तु प्रमाघटितलक्षणे प्रतियोगिवैयधिकरण्यघटितव्यापकत्वमेव तल्लक्षणप्रणेत्रभिप्रेतं, अभिप्रेतञ्चाव्याप्यवृत्तित्वग्रहाभावविशिष्ट-बाधनिश्चयप्रतिबन्धकत्वमेवञ्चाव्याप्यवृत्तित्वग्रहाभावदशायां कपिसंयोगवति वृक्षेऽपि तदभावनिश्चयस्तद्वत्त्वबुद्धिं विरुणद्धि, प्रमाघटितलक्षणविचारे ईदृशप्रतिबध्यप्रतिबन्धकभावो गदाधरेणापि स्वहस्तितः । तथाच तत्र तत्राव्याप्तिवारणार्थं निरवच्छिन्नविरोधितावच्छेदकसम्बन्धावच्छिन्नत्वं साध्याभावप्रकारतायां साध्याभावे वा निरवच्छिन्नवृत्तिकत्ववैशिष्ट्यं निवेशनीयम् ।

एवञ्च प्रतियोगिवैयधिकरण्यघटितव्यापकतायालक्षणकर्त्तुरभिप्रायविषयत्वेऽपि केवलान्वयिसाध्यकस्थलेव्यधिकरणधर्म्मावच्छिन्नाभावस्वीकारं विना गत्यन्तराभावः, प्रमेयमित्याकारकयत्किञ्चिज्ज्ञन्यज्ञानविषयत्वाभावेऽपि निरवच्छिन्नवृत्तिकत्ववैशिष्ट्याभावात् । न चैवम-

ष्यभावे निरवच्छिन्नवृत्तिकत्ववैशिष्ट्यस्य निवेशेऽपि तत्र निरुक्तप्रतियोगिताकत्वस्य स्वरूपसम्बन्धो न निवेशनीयो व्यर्थत्वात्. एवञ्च केवलान्वयिसाध्यकस्थलेऽपि साध्यव्यापकतावच्छेदकजन्यज्ञानविषयतात्वावच्छिन्नप्रतियोगिकत्वस्य प्रसिद्धस्यैककालीनत्वैकज्ञानविषयत्वादिरूपयथाकथञ्चित्सम्बन्धेन निरवच्छिन्नवृत्तिकगगनाभावादौ प्रमीयप्रकारत्वसम्भवेन व्यधिकरणधर्म्मावच्छिन्नाभावं विनापि केवलान्वयिसाध्यकस्थले किमनिष्टमिति वाच्यं प्राक्प्रदर्शितसाध्यकस्थले साध्यं धर्म्मिविशेष्यवृत्तित्वसामान्यभावव्यधिकरणधर्म्मावच्छिन्नाभावविशेषोभयवदितिप्रमामादायाव्याप्तिभयेनोभयत्वादिनिष्ठपर्य्याप्तिसम्बन्धावच्छिन्नप्रकारतावच्छेदकताव्यावर्त्तनाय स्वरूपसम्बन्धातिरिक्तसम्बन्धावच्छिन्नावच्छेदकत्वानिरूपकत्वे निवेशनीये दर्शितपरम्परासम्बन्धेनाभावे निरुक्तप्रतियोगिताकत्वं प्रमांशे प्रकारीकृत्य लक्षणनिर्व्वाहप्रयासस्य जन्मान्धानां सूक्ष्मदृष्टिप्रयाससमानत्वात्। हेतुमद्विशेष्यतानिरूपितप्रमीयनिरुक्तप्रकारतायामेव साध्यवत्त्वग्रहप्रतिबन्धकतावच्छेदकत्वाभावनिवेश एव तल्लक्षणपर्य्यवसानमतो हेतुमति एकत्र द्वयं रीत्या दर्शिताभावद्वयप्रकारकप्रमामादाय न कश्चिदपि दोषः पदमादधाति।

अथ प्रतियोगिवैयधिकरण्यघटितलक्षणादरेऽपि व्यधिकरणसंयोगादिसम्बन्धेन गुणादेरभावमादाय लक्षणसमन्वयसम्भवेन व्यधिकरणधर्म्मावच्छिन्नाभावानुत्थितिरूपदोषस्तदवस्थ एवेति। न च व्यापकतावच्छेदके तत्तत्सम्बन्धावच्छिन्नाधेयतावच्छेदकत्वमपि विशेषणीय-

मिति वाच्यं तद्विशेषणस्य व्यर्थत्वात् सम्बन्धधर्म्मिकोभयाभावपर्य्यवसितप्रतियोगिवैयधिकरण्यनिवेशेऽपि न निस्तारः व्यासज्यवृत्तिधर्म्ममात्रस्यैव व्यापकतावच्छेदकतया व्यधिकरणधर्म्मावच्छिन्नाभावानुत्थितिप्रसङ्गात् । प्रकारित्वादौ संसर्गतास्वीकारे तादृप्येण साध्यतायां व्यभिचारिण्यतिव्याप्तिप्रसङ्गाच्च। इति चेन्न । स्वावच्छेदकानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितासामान्ये यद्धर्म्मावच्छिन्नताच्छेदकताकत्वविशिष्टयत्सम्बन्धावच्छिन्नावच्छेदकताकत्वाभावः सएव धर्म्मस्तत्सम्बन्धेन व्यापकतावच्छेदकइत्यस्य विवक्षितत्वात् प्रतियोगिवैयधिकरण्यघटितनिवेशे सकलव्यभिचारिण्यतिव्याप्तिवारणार्थं साध्यतावच्छेदकावच्छिन्नघटितव्यापकतानिवेशनं न तु केवलप्रतियोगितानवच्छेदकत्वघटितं लक्षणम् । दर्शितमहाकालवृत्तित्वसामान्याभावप्रमामादाय प्रागुक्ताव्याप्तिवारणार्थं साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगितायां तादृशव्यापकतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशनमपि सुष्ठु सङ्गतमेव । दुर्ज्ञेयत्वादिदोषकवलितस्वप्रणीतलक्षणापेक्षया समीचीनमपि प्रमाघटितलक्षणं दीधितिकृता कथं न समादृतमेतद्बीजं नावधारयितुं प्रभवामः ।

ग्राह्यतदभावज्ञानस्य दर्शितभिन्नप्रकारकज्ञानस्यापि वा प्रतिबध्यप्रतिबन्धकभावोऽस्तु, तदुभयमत एव दीधितिकृत्प्रणीतलक्षणे सकलविशेषणानामेव सार्थक्यं भवति, परकीयप्रमाघटितलक्षणे तु न तथा इत्येतल्लक्षणापेक्षया स्वप्रणीतलक्षणस्योत्कर्ष एव प्रमाघटितलक्षणे साध्याभाववैयर्थ्यं प्रदर्श्य दीधितिकृता सूचित इति न वक्तुमर्हसि । दीधितिकृल्लक्षणस्य जातिस्वरूपं तत्सामान्या-

भावाभावमादायाव्याप्तिभयेन तल्लक्षणवाक्यस्याभावपदं भावभिन्नपरतया व्याख्यातं जगदीशेन। अभावत्वप्रतीतेः प्रमात्वरक्षार्थं येषां मतेऽभावमात्रस्यैव न भावस्वरूपता तन्मते दीधितिकृल्लक्षणघटकाभावस्य सार्थक्यं नास्त्येव। एवञ्च दीधितिकृल्लक्षणं किमुक्तमतद्वयसाधारणं भवति? अतः प्रमाघटितलक्षणकारस्य दीधितिकारस्य च मतविशेषावलम्बनं विना न निस्तारः। तस्मात् प्रमाघटितलक्षणकर्त्तुः कोऽनुयोगः? प्रमाघटितलक्षणन्तु भावेऽभावत्वमस्तु न वा उभयथापि मतद्वयसाधारणमेव भवितुमर्हति तत्र साध्याभाव इत्यत्राभावप्रवेशस्यानावश्यकत्वात् तल्लक्षणवाक्यस्याभावपदन्तु साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताया अधिकरणत्वप्रकारित्वसंयोगसम्बन्धादीनां प्रतियोगित्वाख्यनिरूपकताविलक्षणाया लाभसम्पादकमेव, न त्वभावस्यापि प्रमाघटितलक्षणे प्रवेशोऽस्ति। इति दीधितिकारलक्षणापेक्षया प्रमाघटितलक्षणे उत्कर्षः किं न जागर्त्ति। प्रतियोगितात्वं न दर्शितसकलनिरूपकतासाधारणमिति जगदीशस्य सम्मतं, किमधिकं दीधितिकारस्यापि; इति सिद्धान्तलक्षणे प्रतियोगिताधर्म्मकोभयाभावघटितलक्षणस्य सम्बन्धघटितोभयाभावघटितलक्षणस्य च विचारदर्शनेन व्युत्पन्नैरवधार्य्यताम्। अतएव मुक्तकण्ठं ब्रूमः किमपि लक्षणं सर्व्वमतसाधारणं न भवितुमर्हति।

अथाभावीयप्रतियोगित्वमधिकरणत्वीयप्रतियोगित्वमेतदुभयसाधारणं प्रतियोगितात्वमेकमेव, न तु तस्य परस्परवैलक्षण्यमिति गदाधरसम्मतम्। तन्मतमाश्रित्य व्यधिकरणधर्म्मावच्छिन्नाभावोत्थितिमात्रप्रयोजनकस्य

साध्याभावस्थिताभावपदार्थस्य निवेशव्यर्थतायामेव दीधितिकृतस्तात्पर्य्यमिति चेन्न यतः सूक्ष्मविवेचनया गदाधरेणापि अभावनिरूपकत्वाधिकरणतानिरूपकत्वगतं प्रतियोगितात्वं नैकमिति स्थिरीकृतमित्यवधारयामः । सामान्यनिरुक्तौ प्रमेयत्वमभिधेयत्वस्य व्यभिचारीति दीधितिकृत्पङ्क्तिव्याख्यानावसरे इदन्त्वावधातव्यमित्यादिलिखनदर्शनात् । तदुभयसाधारणप्रतियोगितात्वस्यैक्ये कथं तेन तत्र तादृशप्रतियोगित्वाप्रसिद्धिः प्रदर्शिता ? वयन्तु ब्रूमः—प्राग्दर्शितायोगोलकीयवह्निभिन्नवह्न्यादिसाध्यकसद्धेतौ अव्याप्तिवारकस्य प्रतियोगितायां साध्यव्यापकतावच्छेदकधर्म्ममात्रावच्छिन्नत्वनिवेशस्यावश्यकत्वेन सामान्यधर्म्मावच्छिन्नाधिकरणताया अप्रामाणिकतया विषयित्वादिप्रतियोगितायाश्च सम्बन्धानवच्छिन्नतयाधिकरणत्वविषयित्वव्यावर्त्तनप्रयोजनकाभावनिवेश एव नास्ति तावतापि व्यधिकरणधर्म्मावच्छिन्नाभावस्योत्थितिसम्भवः । अभावपदं तु स्वरूपकथनं न तु तत्त्वेन प्रवेशः, प्रयोजनाभावात् । इत्यास्तां विस्तरः ।

साध्याभावसजातीयव्यापकीभूतव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकधर्म्मेण यद्धर्म्मावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते इति मिश्रस्य एकं लक्षणमादौ दीधितिकारप्रदर्शितं तदनन्तरं साध्याभावसजातीयव्यापकीभूताभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वमिति तस्य लक्षणान्तरं च । तत्र प्रथमदर्शितलक्षणघटकप्रतियोगितायां सामान्यधर्मेण विशेषाभावमादायातिव्याप्तिवार

णार्थं यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यजगद्वृत्तिभिन्नत्वोभयाभावस्तदात्मकत्वरूपंव्याप्यवृत्तितानिरूपकत्वं जगदीशेनोक्तम्। द्वितीयलक्षणघटकप्रतियोगितायां तु तादृशाभावमादायातिव्याप्तिवारणाय स्वाश्रयस्वानाश्रयवृत्तिधर्म्मानवच्छिन्नत्वं निवेशितम्।

अथ प्रथमलक्षणीयप्रतियोगितायां निवेशितविशेषणं द्वितीयलक्षणे जगदीशेन कथं परित्यक्तम्? न च लाघवमनुसन्धाय तत्कल्पस्त्यक्त इति वाच्यम्, तथा सति पूर्वलक्षणे ईदृशलघुविशेषणस्य परित्यागे जगदीशस्यातीवन्यूनतापातात् इति चेन्न वह्नित्वेन विशिष्टसत्ताभावं चादायातिव्याप्तिभिया प्रथमलक्षणे द्वितीयलक्षणोक्तविशेषणस्य परित्यागात्। अथ तादृशाभावमादाय द्वितीयलक्षणस्यातिव्याप्तिरतस्तद्वारणार्थं द्वितीयलक्षणेऽपि प्रथमलक्षणोक्तविशेषणमेवोचितमिति चेन्न तथा सति द्रव्यत्वादिसाध्यकगुणादिहेतावव्याप्त्यापत्तेः। न च दर्शितोभयाभावविशिष्टाभावादिकमादायातिव्याप्तिरेतल्लक्षणस्य कथं वारयितुं शक्यते इति वाच्यम् अगत्या उभयत्वमेकविशिष्टापरत्वं विशिष्टं च केवलादन्यदितिमताश्रयणस्यैतल्लक्षणे आवश्यकत्वात्। न चैवं प्रतियोगितायामीदृशविशेषणस्य दाने प्रमेयत्वेन यावान्नास्तिगगनतदन्योभयं नास्तीतिप्रतीतिसिद्धाभावमादाय प्रमेयहेतौ लक्षणसमन्वयसम्भवेन दीधितिकृत्प्रदर्शिताव्याप्तिः कथं सम्भवेदिति वाच्यम् उक्तप्रतीतिसिद्धाभावीयप्रतियोगिताया अवृत्तिपदार्थेष्वेव स्वीकारात्; एवं व्यवस्था

भावत्वेनाभावानामभावत्वेन भावानामित्यादिदीधितिकृत्पंक्तिव्याख्यानावसरे जगदीशेन प्रदर्शिता ।

अत्रेदं चिन्त्यम्—प्रमेयत्वेनावृत्तितदन्योभयाभावः कथं व्यावर्त्तनीयः ? न हि तत्राप्यवृत्तावेव प्रतियोगित्वं कल्पयितुं शक्यते, तथा सत्यभावांशे प्रतियोगिनोऽभ्रमत्वापातात् । इति सर्व्वेषामेव सिद्धान्तः । वयं तु ब्रूमः-मिश्रलक्षणद्वय एव साध्याभावसजातीयाभावप्रतियोगितायां स्वसमानाधिकरणस्वावच्छेदकधर्म्मावच्छिन्नाधिकरणनिरूपितवृत्तितावच्छेदकानुयोगितानिरूपितप्रतियोगिताभिन्नत्वं निवेश्य सामान्यधर्म्मेण विशेषाभावादिकं वारणीयम् । अयं तु विशेषः,—द्वितीयलक्षणे वृत्तितायां निरच्छिन्नत्वं निवेश्यते, न तु जगदीशोक्तमिश्रद्विविधलक्षणे द्विविधविशेषणम्, प्रथमलक्षणे प्रमेयत्वेन गगनं नास्तीत्यभावमादाय सर्वत्र सङ्केतौ लक्षणगमनसम्भवे व्यधिकरणधर्म्मावच्छिन्नाभावस्यानुत्थितिप्रसङ्गात्, द्वितीयलक्षणे दर्शितप्रमेयत्वेन अवृत्तितदन्योभयाभावमादायाव्याप्तिवारणसम्भवाच्च ।

अत्रायं महानाक्षेपः निबन्धकारवरदीधितिकारो मिश्रलक्षणतात्पर्य्यमवधारयितुं न प्रभवतिस्म । तस्य तदवधारणे सति प्रमेयत्वव्यधिकरणप्रतियोगित्वाप्रसिद्धिं प्रदर्श्य तल्लक्षणदोषदाने साहसं न स्यात् । मिश्राभिप्रेतार्थस्तु द्वितीयलक्षणघटकहेतुतावच्छेदकनिष्ठप्रतियोगितावच्छेदकतायां हेतुतावच्छेदकतावच्छेदकसम्बन्धानवच्छिन्नत्वहेतुतावच्छेदकप्रतियोगिकत्वोपलक्षितसम्बन्धावच्छिन्नत्वोभयाभाववत्त्वं निवेशनीयम् । एवं च प्रमेयादिहेतु-

स्थले व्यधिकरणसंयोगादिसम्बन्धावच्छिन्नहेतुतावच्छेदकनिष्ठं प्रतियोगितावच्छेदकत्वं सुप्रसिद्धमेव ।

अथ स्वसमानाधिकरणस्वावच्छेदकेत्यत्र स्वसमानाधिकरण्यनिवेशोविफलः । न च हेतुतावच्छेदकरूपेण व्यधिकरणधर्म्मावच्छिन्नाभावीयप्रतियोगितामात्र एव लक्षणाघटकत्वप्रसङ्ग इति वाच्यम् व्यधिकरणसम्बन्धावच्छिन्नहेतुतावच्छेदकनिष्ठावच्छेदकताकप्रतियोगितामादायैव लक्षणसमन्वयसम्भवात् । एवं मिश्रस्य पूर्व्वोक्तलक्षणे यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यजगदवृत्तिभिन्नत्वोभयाभावो जगदीशेन निवेशितस्तत्रापि जगदवृत्तिभिन्नत्वनिवेशो व्यर्थ एव । गगनेन घटत्वपटत्वाभ्यां वाभावमादाय तत्तल्लक्षणोपपत्तिसम्भवात् । यतो गगनादौ साध्यवन्निष्ठाभावीयप्रतियोगितायाश्चाभिन्नत्वे सति अवच्छेदकत्वस्य सामान्याभावरूपव्यापकतावच्छेदकत्वं सर्व्वत्रैव सम्भवति । इति चेन्न यतो व्यधिकरणधर्म्मावच्छिन्नप्रतियोगित्वं पदार्थान्तरं न तु प्रतियोगितावच्छेदकादियत्किञ्चित् स्वरूपमपीति चक्रवर्त्तिलक्षणविचारे जगदीशेन स्वहस्तितम् । अत्र विचार्य्यं प्रतियोग्यंशे घटत्वं प्रकारीभूय पटत्वेन घटोनास्ति मठत्वेन एवं गगनेन घटावृत्त्यपरनिखिलधर्म्मान्यतमेन वा घटोनास्तीतिबहुविधप्रत्ययविषयघटनिष्ठप्रतियोगित्वमेकमेव लाघवात् । तावतैव प्रतीतेरप्रसङ्गस्यातिप्रसङ्गस्य चासम्भवात् । न तु तत्तत्प्रतीतेर्वैलक्षण्येन प्रतियोगित्वस्यापि तत्र वैलक्षण्यम्, अप्रामाणिकानन्तप्रतियोगिताकल्पनापत्तेः । समवायितया गगनादिना वा वाच्यत्वं नास्तीत्यादिनानाविधप्रत्ययविषयवा-

च्यत्वनिष्ठप्रतियोगित्वमप्येकमेव । एवं च तत्र तत्र तत्तदंशानिवेशे व्यधिकरणधर्म्मावच्छिन्नाभावस्य क्वापि धर्त्तुं न शक्यते, गगनावच्छिन्नप्रमेयाभावीयप्रतियोगितायाअपि संयोगसम्बन्धावच्छिन्नघटत्वादिनिष्ठावच्छेदकताकतया तादात्म्यसम्बन्धावच्छिन्नगगनतदन्योभयादिनिष्ठावच्छेदकतया च लक्षणघटकत्वं न हि सम्भवति। इति सर्व्वैरेवापरिचितः पन्थाः ।

यदि च प्रमेयस्य हेतुतावच्छेदकतास्थले तद्व्यधिकरणसम्बन्धाप्रसिद्धिस्तत्रैवाव्याप्तिर्दीधितिकृत्सम्मता इत्युच्यते तदा गगनाभावीयप्रतियोगित्वानिरूपितत्वहेतुतावच्छेदकतायाः सांसर्गिकावच्छेदकतापर्य्याप्तावच्छेदकताकसांसर्गिकावच्छेदकत्वानिरूपकत्वोभयाभावस्य तत्र निवेशनीयत्वात् । एवं स्वरूपसंयोगोभयसम्बन्धावच्छिन्नावच्छेदकतामादायाव्याप्तिर्वारयितुं शक्यते ।

न च तादृशरूपावच्छिन्नसंसर्गत्वं प्रमाज्ञानीयं भवति भ्रमेऽपि तादृशरूपावच्छिन्नसंसर्गत्वमित्येव नियमः । अतएव संसर्गांशे भ्रमोऽप्रामाणिक इति वाच्यम्, अवच्छेदावच्छेदेन भ्रममात्रस्यैव विलयापत्तेः सुतरां तत्र प्रतिबध्यप्रतिबन्धकभावस्य च । अस्तु वा तादृप्येण संसर्गत्वमप्रामाणिकं तावतापि लक्षणपरिष्कारः सम्भवति । तथा हि तादृशप्रतियोगितावच्छेदकतायां हेतुतावच्छेदकताघटकसम्बन्धानवच्छिन्नत्वद्रव्यनिष्ठप्रतियोगिताऽनिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकताभिन्नत्वोभयाभावो निवेशनीयः । एवं च सर्व्वत्र हेतौ व्यधिकरणधर्म्मावच्छिन्नाभावसजातीयोहेतुतावच्छेदकधर्म्मनिष्ठ-

संयोगरूपव्यधिकरणसम्बन्धावच्छिन्नावच्छेदकताकगुणादिनिष्ठप्रतियोगिताकः संयोगसम्बन्धेन हेतुतावच्छेदकधर्म्मेण द्रव्यभिन्नो नास्तीत्यादिप्रतीतिसिद्धाभावएव । न च निरुक्तौ संयोगसम्बन्धावच्छिन्नावच्छेदकतानिवेश एवास्तु किं पुनस्तत्र द्रव्यनिष्ठप्रतियोगित्वानिरूपितत्वविशेषणेनेति वाच्यम् संयोगेन वह्निमतस्तादात्म्यादिसम्बन्धेन साध्यत्वे कालिकसम्बन्धेन वह्निमतस्तेनैव सम्बन्धेन हेतुत्वे संयोगसम्बन्धेन हेतुतावच्छेदकीभूतवह्निमतोभेदादिकमादायातिव्याप्त्यापत्तेः । एवं रीत्या मिश्रलक्षणपरिष्कारमनुसन्धाय जगदीशेन निर्युक्तिकमपि गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वपक्षमवलम्ब्य "सर्व्वस्वेनापि कर्त्तव्यं मातापित्रोर्मृताहनी" तिन्यायेन मिश्रलक्षणं दूषितम् ।

अत्रेदमालोचनीयम्,—गुरुधर्म्माणां प्रतियोगितानवच्छेदकत्वमते तेष्वभावप्रतियोगितावच्छेदकत्वमिवाधिकरणताप्रतियोगितावच्छेदकत्वं नास्तीति सर्व्वेषामेव व्यवस्था विशेषाभावात् । अतएव बिशेषव्याप्तौ सर्व्वनिबन्धकारप्रधानदीधितिकारलिखनम्,—गुरुधर्म्माणामभावप्रतियोगितावच्छेदकत्वमिव सामानाधिकरण्यप्रतियोगितावच्छेदकत्वं नास्ति विवक्षितञ्चात्र तथेति । एवं च गुरुधर्म्माणां प्रतियोगितानवच्छेदकतया यदि मिश्रलक्षणं दुष्टं भवेत् तदा हेतुतावच्छेदकावच्छिन्ननिरूपकताकाधिकरणत्वघटितदीधितिकारोक्तनिखिललक्षणान्यपि दुष्टानि स्युः ।

अथ वृत्त्यनियामकसम्बन्धावच्छिन्नप्रतियोगित्वान-

ङ्गीकृन्मत एव मिश्रलक्षणदोषे तात्पर्य्यमिति चेन्न यतो दीधितिकारोक्तसिद्धान्तलक्षणीयप्रतियोगिताधर्म्मिकोभयाभावघटितलक्षणवाक्यस्य जगदीशेन वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वेऽवच्छेदकत्वघटितोभयाभावतात्पर्य्यकत्वमुपवर्णितं तावता दीधितिकारस्य किं न्यूनत्वमवधार्य्यते । तथा मिश्रलक्षणवाक्यस्यापि सजातीयाभावप्रतियोगितास्थले सजातीयभेदप्रतियोगितावच्छेदकत्वपरत्वोपवर्णनं क्रमपचयमाधास्यति । व्यधिकरणधर्म्मावच्छिन्नावच्छेदकताभेदमादाय तल्लक्षणासम्भवनिरासः क्रियते । व्यधिकरणधर्म्मावच्छिन्नप्रतियोगितावत् सेान्दोड़मते तदवच्छिन्नावच्छेदकतापि प्रामाणिकी, प्रत्ययस्याविशेषात् । तादृशावच्छेदकत्वं मिश्रसम्मतमिति चक्रवर्त्तिचरमलक्षणविचारे जगदीशेन स्वहस्तितम् । केवलान्वयिग्रन्थे साध्याभाववदवृत्तित्वलक्षणविचारे गदाधरेणापि तादृशावच्छेदकत्वं प्रदर्शितम ।

हेतुतावच्छेदकावच्छिन्नाधिकरणसाध्यतावच्छेदकावच्छिन्नाधिकरणप्रतियोगितावच्छेदकावच्छिन्नाधिकरणघटितानि सर्व्वाण्येव लक्षणानि गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वस्येवाधिकरणत्वप्रतियोगित्वावच्छेदकत्वस्यास्वीकारेऽपि आस्तिका एव परिष्कर्त्तुं प्रभवन्ति । इति ध्येयम् ।

श्रीलराखालदासेन न्यायरत्नेन धीमता ।
सद्विचारस्य शिक्षार्थं निबन्धोऽयं प्रकाशितः ॥
एतद्विचारविज्ञानं भवेच्चेद्दूरदर्शिनः ।
नाप्रीतोऽसौ भवेत् स्याच्च सफलोमत्परिश्रमः ॥